दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् कृष्णामावस्या
आश्विन् 24 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-13 ■ वर्ष-5 ■ अङ्क-351 | 1 | अक्तूबर 10, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 केन्द्रेण प्रदत्तानि अर्बुद-रूप्यकाणि, किन्तु व्ययीकरणे विफलः राज्य-सर्वकारः – जेपी-नड्डा

4 महाराष्ट्र-शासनस्य पक्षतः कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये 'अभिजात-मराठी-भाषा-सप्ताहस्य' अवसरे विशेष-कार्यक्रमस्य आयोजनम्

10 न्यायरत्न-वैयाकरण पण्डित महेशझामहोदयस्य व्यक्तित्वं कृतित्वञ्च

जन्तर-मन्तर-स्थले प्रतिषेध-प्रदर्शनार्थं दिल्ली-आरक्षि-दलेन प्रत्याख्याता अनुमतिः



दिल्ली-आरक्षि-बलेन जन्तर-मन्तर-स्थले सीजेपी इत्यनेन आयोजयितुं निश्चितस्य प्रस्तावित-विरोध-प्रदर्शनस्य अनुमतिः प्रत्याख्याता। नवदेहल्यां वार्ताहरान् सम्बोधयन्ती दिल्ली-आरक्षि-बलस्य संयुक्तायुक्ता नूपुर-प्रसादः अवोचत् यत् जन्तर-मन्तर-स्थले प्रतिषेध-सभानाम् अथ अन्य-कार्यक्रमाणाम् आयोजनाय दश-दिवसेभ्यः पूर्वमेव आवेदनपत्रं समर्पणीयम्। संयुक्त-आरक्ष्यायुक्तया स्पष्टीकृतं यत् अनेन समूहेन पूर्वमपि अस्मिन् स्थले विरोध-प्रदर्शनाय अनुमतिः लब्धा आसीत्, किन्तु तैः निर्धारितानां मार्गदर्शिकानां अथ च समर्पितानाम् आश्वासन-पत्राणाम् अनुपालनं न कृतम्। सा न्यरूपयत् यत् वर्तमान-शान्ति-व्यवस्थां लोकसुरक्षां अथ च नवदिल्ली-क्षेत्रस्य यातायात नियमनं दृष्ट्वा अनुमति-निषेधस्य अयं निर्णयः गृहीतः। नूपुर-प्रसादेन अग्रे प्रतिपादितं यत् क्षेत्रेऽस्मिन् लोक-सुरक्षायै, व्यवस्था-रक्षणाय भारतीय-नागरिक सुरक्षा-संहितायाः त्रिषष्ट्यधिकैकशतम् इति धारायाः अन्तर्गतं निषेधाज्ञा प्रवृत्ता। संयुक्तायुक्तया सचेतितं यत् विधि-नियम-उल्लङ्घनकारिणः कस्यापि जनस्य विरुद्धं दिल्ली-आरक्षि-बलेन समुचितं वैधानिकं कार्याचरणं विधास्यते।

अद्यतनीयं सुभाषितम्

व्रजन्ति न निवर्तन्ते सोतांसि सरितां यथा।
आयुरादाय मर्त्यानां तथा रात्र्यहनी सदा॥

अर्थात्- जैसे नदी के जलप्रवाह जाते हैं और फिर लौटते नहीं हैं, वैसे ही रात और दिन प्राणियों की आयु को ले कर प्रतिक्षण चले जाते हैं और लौटते नहीं हैं।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७११९ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमलदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा



प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां स्व-निवासस्थाने षड्विंशत्यधिक-द्विसहस्रतमस्य विश्व-कौशल-प्रतिस्पर्धायाः भारतीय-युव-विजेतृभिः सह सम्भाषणं कृतवान्

प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां स्व-निवासस्थाने षड्विंशत्यधिक-द्विसहस्रतमस्य विश्व-कौशल-प्रतिस्पर्धायाः भारतीय-युव-विजेतृभिः सह सम्भाषणं कृतवान्। सामाजिक-पटलीय-सन्देशे प्रधानमन्त्रिणा प्रतिपादितं यत् अस्मिन् जागतिक-आयोजने भारतीय-युवानः दीप्तिमन्तः अभवन्। सः सम्पूर्णेन दलेन सह संवादं विहितवान् अथ च तेषाम् उत्कृष्ट प्रदर्शनाय अभिनन्दनं व्याहृतवान्। उल्लेखनीयं वर्तते यत् अस्यां स्पर्धायां भारतेन षट् रजत पदकानि सहैव विंशतिः उत्कृष्टता-पदकानि विजितानि, येन देशः प्रथमवारं जागतिक-स्तरे दशमं स्थानम् अवाप्तवान्। इयं जागतिक-कौशल-प्रतिस्पर्धा विगत-मासस्य द्वाविंशति-दिनाङ्कतः सप्तविंशति-दिनाङ्क यावत् चीन-देशस्य शङ्घाई-नगरे समायोजिता आसीत्।

गतरात्रिनववादनात् देहल्याः सप्तपञ्चाशत् मेट्रो-स्थानकानि पिहितानि



दिल्ली-मेट्रो-रेल-निगमेन सूचितं यत् राष्ट्रिय-राजधानी-क्षेत्रे सुरक्षा-दृष्ट्या गतरात्रौ नववादनतः मध्य-देहल्याः सप्तपञ्चाशत् मेट्रो-स्थानकानि पिहितानि । एतेषु पिहितेषु स्थानकेषु राजीव-चौक, लोक-कल्याण-मार्ग, केन्द्रीय-सचिवालय, जनपथ, पटेल-चौक, नवदिल्ली, सेवातीर्थ अथ च मण्डी-हाउस-प्रभृतीनि प्रमुख स्थानकानि सम्मिलितानि सन्ति। निगमेन स्पष्टीकृतं यत् नवदिल्ली-मेट्रो-स्थानकं विहाय अन्येषु सर्वेषु सम्बद्ध-स्थानकेषु मेट्रो-परिवर्तनस्य सुविधा पूर्ववत् उपलभ्या भविष्यति। मेट्रो-प्रशासनेन उक्तं यत् स्थानक-पिधानस्य अयं निर्णयः अग्रिम सूचनां यावत् प्रभावित्वेन स्थास्यति।



प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां महिला-बालविकास विभागीय-शिखरसम्मेलनस्य समापन सत्रे भागं ग्रहीतवान्

प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां महिला-बालविकास विभागीय-शिखरसम्मेलनस्य समापन सत्रे भागं ग्रहीतवान्। अस्मिन् द्विदिवसीये सम्मेलने सर्वेषां राज्यानां महिला-बालविकास-सम्बद्धाः मन्त्रिणः, राजनीतिक-नेतारः, वरिष्ठ-प्रशासनिकाधिकारिणश्च सहभागितां कुर्वन्ति। प्रधानमन्त्रिणः परिकल्पनया आयोज्यमानानां विभागीय-शिखरसम्मेलनानां शुङ्खलायाम् इदं द्वितीयं सम्मेलनं वर्तते। अस्य मुख्यम् उद्देश्यं सहकारी सङ्घीय-व्यवस्थायाः सुदृढीकरणम्, राष्ट्रिय-प्राथमिकतानां प्राप्तये सामूहिक-उत्तरदायित्व-भावनायाः संवर्धनं अथ च केन्द्र-राज्ययोः दृढ-सहयोगेन कार्य-परिणामानां द्रुतीकरणम् अस्ति। अस्मिन् सम्मेलने चतुर्ष प्रमुख-विषयेषु दृष्टिः केन्द्रीकृता अस्ति। पोषणम् प्रारम्भिक शिक्षा, बाल-संरक्षणम् महिलानां सुरक्षा सशक्तीकरणं चेति।

भारत-इथियोपिया-सामरिक सन्धिः सामूहिक-मूल्येषु दक्षिण-ऐक्यभावे च प्रतिष्ठितः – विदेशमन्त्री



विदेशमन्त्रिणा डा.एस. जयशङ्करेण प्रतिपादितं यत् भारत-इथियोपिया-देशयोः सामरिक-सन्धिः परस्पर-सहभागि मूल्येषु समान-आकाङ्क्षासु अथ च ऐतिहासिके दक्षिण-ऐक्यभावे प्रतिष्ठिता अस्ति। डा. जयशङ्करः अदीस अबाबा-नगरे स्व-समकक्ष्येण इथियोपिया-देशस्य विदेश-मन्त्रिणा गेडियन-तिमोथिवोस्-हेस्सेबोन् इत्यनेन सह द्विपक्षीय वार्ता विहितवान्। सामाजिक-पटलीय-सन्देशे तेन सूचितं यत् अस्यां वार्तायां व्यापार-निवेश-विकास-परियोजनाभ्यः आरभ्य आधारभूत संरचना-सामुद्रिक सुरक्षा-प्रौद्योगिकी-सांस्कृतिक-क्षेत्राणि यावत् द्विपक्षीय-सम्बन्धानां दृढीकरणे दृष्टिः केन्द्रीकृता आसीत्। उभाभ्यां पक्षाभ्यां वैश्विक घटनाक्रमेषु स्व-दृष्टिकोणानाम् आदान-प्रदानं कृतम्, अथ च बहुपक्षीय-मञ्चेषु सहभागितायाः भारत-अफ्रीकी-सङ्घ सहकार्यस्य च संवर्धने सम्मतिः प्रकटीकृता।

विदेश-मन्त्रालयेन स्पष्टीकृतं यत् पर्म-प्रक्रिया-निलम्बनं एच-1 बी वीजा वैधतां न बाधते



विदेशमन्त्रालयेन स्पष्टीकृतं यत् अमेरिका-देशस्य श्रम-विभागेन कतिपय-संस्थानां कृते स्थायि-श्रम-प्रमाणीकरण-कार्यक्रमे गृहीतः निर्णयः एच-1 बी-वीसा-कार्यक्रमात् सर्वथा पृथक् वर्तते। मन्त्रालयेन स्ववक्तव्ये प्रतिपादितं यत् पर्म-आवेदन-पत्राणां निलम्बनेन स्वयं एच-1 बी-वीसा-वैधतायां वा तद्धारकाणां तेषां च आश्रितानां वर्तमान स्थिती कोऽपि प्रत्यक्ष प्रभावः न भविष्यति। यद्यपि प्रभावित-संस्थानां योग्यानां कर्मचारिणां स्थायि-निवास-प्रक्रियायां कश्चन प्रभावः सम्भाव्यते। अस्मिन् सन्दर्भ अमेरिका-देशस्य उपराष्ट्रपतिनः टिप्पण्यः अनुचिताः इति आक्षिपता मन्त्रालयेन उक्तं यत् एतादृशानि वक्तव्यानि तथ्यम् उपेक्षन्ते। भारतेन दृढतया प्रतिपादितं यत् अमेरिका-देशे कार्यरताः भारतीयाः कुशलाः वृत्तिकाः उच्च-शिक्षिताः सन्ति अथ ते तद्देशस्य अर्थव्यवस्थायां नवनिर्माण-पारिस्थितिकी-तन्त्रे च महत्त्वपूर्णम् अवदानं यच्छन्ति।

'केन्द्रेण प्रदत्तानि अर्बुद-रूप्यकाणि, किन्तु व्ययीकरणे विफलः राज्य-सर्वकारः' — जेपी-नड्डा



हिमसंस्कृतवार्ता — बिलासपुरम्।

हिमाचलप्रदेश-सर्वकारेण केन्द्रात् आर्थिक-साहाय्यस्य अभावाय आरोप्यमाणानाम् अभियोगोपरि केन्द्रीय-स्वास्थ्य-परिवार-कल्याण-मन्त्री जगतप्रकाश-नड्डा-महोदयः दृढं प्रत्युत्तरं दत्तवान्। बिलासपुर-प्रवासे समुपस्थितः केन्द्रीयमन्त्री वार्ताहर-सम्मेलने साङ्ख्यिकीय-तथ्यानि उपस्थाप्य अवदत् यत् केन्द्रेण हिमाचलस्य विविधाभ्यः विकास-परियोजनाभ्यः अर्बुदशः (अरबों) रूप्यकाणि प्रदत्तानि, किन्तु राज्य-सर्वकारः एतासां निधीनां सदुपयोगे सर्वथा असमर्थः सिद्धः जातः। सः उदैरयत् यत् केवलं राष्ट्रिय-राजमार्गेभ्यः एव केन्द्रेण पञ्चपञ्चाशत्-सहस्र-कोटि-रूप्यकेभ्यः (₹५५,००० कोटि) अधिकं धनं दत्तम्, यत् प्रदेशस्य साकल्य-बजटात् अपि अधिकम् अस्ति।

रेल-परियोजनासु राज्यस्य भागः अनिहितः, भू-अधिग्रहणं च अवरुद्धम्

रेलमार्ग-कार्याणां मन्द-गतिम् अधिकृत्य जेपी-नड्डा-महोदयः विज्ञापितवान् यत्:

> भानुपल्ली-बिलासपुर-बैरी-रेलमार्गः - द्विषष्टि-किलोमीटर-दीर्घस्य (६२ कि.मी.) अस्य मार्गस्य अनुमानितः व्ययः १३,४१० कोटि-रूप्यकाणि अस्ति। अत्र राज्येन स्वकीय-भागरूपेण ४,८१८ कोटि-रूप्यकाणि दातव्यानि आसन्, किन्तु राज्येन एतावता केवलं ८४७ कोटि-रूप्यकाणि एव दत्तानि। तदतिरिच्य बिलासपुरतः बैरी-पर्यन्तं राज्य-सर्वकारेण भू-अधिग्रहणम् अपि न विहितम्।

> चण्डीगढ-बद्दी-रेलमार्गः- १५४० कोटि-रूप्यकाणां व्ययायुक्तायाम् अस्यां परियोजनायां ११६० कोटि-रूप्यकाणि व्ययीकृतानि, किन्तु अत्रापि राज्य-सर्वकारेण स्व-भागस्य २३१ कोटि-रूप्यकाणि न समर्पितानि।

चिकित्सा-उपकरण-वाटिकायाः प्रत्यार्पणं, युवभ्यः जीविका-हानिः

स्वास्थ्य-निवेश-विषये राज्य-सर्वकारं लक्षीकृत्य नड्डा-महोदयः अवदत् यत् सः महता परिश्रमेन राज्यस्य कृते शत-कोटि-रूप्यकाणां (₹१०० कोटि) 'चिकित्सा-उपकरण-उद्यानं' (Medical Device Park) स्वीकृतवान् आसीत्। किन्तु राज्य-सर्वकारेण अक्टूबर्-२०२४ मध्ये अयं प्रस्तावः प्रत्याहृत्य त्रिंशत्-कोटि-रूप्यकाणां (₹३० कोटि) प्रथमांशः केन्द्राय प्रत्यर्पितः। अनेन कृतघ्न-निर्णयेन युवभ्यः जीविकायाः महती सुवर्ण-सुविधा अपहृता। तदतिरिच्य पञ्चदश-वित्त-आयोगे प्राप्तेषु ५२१ कोटि-रूप्यकेषु राज्येन केवलं ३९० कोटि-रूप्यकाणि एव व्ययीकर्तुं शक्तानि।

क्रिटिकल-केयर-ब्लॉक' तथा प्रयोगशालानां कार्याणि अपूर्णानि

केन्द्रीयमन्त्रिणा उल्लिखितं यत् २०२१-२२ वर्षे नव (९) आपत्कालीन-स्वास्थ्य-खण्डानां निर्माणाय ३६० कोटि-रूप्यकाणि प्रदत्तानि आसन्, किन्तु एतावता केवलम् एकस्यैव निर्माणं जातम्। तथैव द्वादशसु (१२) एकीकृत-स्वास्थ्य-प्रयोगशालासु एकापि न सिद्धा। केन्द्रेण राज्यस्य साहाय्यार्थं मार्च-२०२७ पर्यन्तं समय-सीमा प्रवर्धिता।

'जाइका' (JICA) साहाय्येन १४२२ कोटि-रूप्यकाणां स्वीकृतिः

नड्डा-महोदयः स्पष्टीकृतवान् यत् मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य निवेदनानन्तरं तेन 'जाइका'-परियोजनान्तर्गतं १४२२ कोटि-रूप्यकाणि स्वीकृतानि, यस्मिन् राज्येन केवलं दश-प्रतिशतं (१०%) धनं दातव्यम्। अस्याः राशेः:

चम्बा-, नाहन-, हमीरपुर-मेडिकल-महाविद्यालयेभ्यः ५४७ कोटि-रूप्यकाणि,

ऊना-स्थिताय पीजीआई-उपकेन्द्राय (Satellite Centre) ४९५ कोटि-रूप्यकाणि,

शिमला-स्थिते आईजीएमसी-संस्थाने सुपर-स्पेशियलिटी-भवनाय २०० कोटि-रूप्यकाणि प्राप्तानि।

मार्ग-परियोजनासु प्रगतिः; किशाऊ-जलाशयाय राष्ट्रिय-परियोजना-गौरवम्

कीरतपुर-मनाली चतुष्पथ-मार्गः १२,९३९ कोटि-रूप्यकाणां व्ययेन निर्मीयमाणः वर्तते । अयं मार्गः मार्च-२०२७ पर्यन्तं सम्पूर्णः भविष्यति। अस्मिन् ४४ किलोमीटर व्याप्ताः ३१ आन्तर्भौमिकमार्गाः सन्ति। तथैव परवाणू-सोलन-शिमला-उपनगर-मार्गः सोलन-कैथलीघाट-मार्गः च सितम्बर-२०२८ पर्यन्तं पूर्णतां यास्यति।

पीएमजीएसवाई (PMGSY): ४,१७० मार्गेभ्यः १३,६९७ कोटि-रूप्यकाणि प्रदत्तानि। प्रथम-चरणस्य नव (९) अवशिष्टान् मार्गान् २०२७ पर्यन्तं शीघ्रं सम्पूरयितुं राज्य-सर्वकारः आदिष्टः।

१५,६२४ कोटि-रूप्यकाणां किशाऊ-बहुउद्देश्यीय-जलाशयस्य नवति-प्रतिशतं (९०%) व्ययं केन्द्र-सर्वकारः वहिष्यति। अनेन षड्-राज्यानां सम्मत्या ९७ सहस्र-हेक्टेयर-भूमौ सेचनं तथा च १४७६ मिलियन-यूनिट्-परिमितं विद्युत्-उत्पादनं सेत्स्यति।

अस्यां पत्रकार-वार्तायां काङ्गड़ा-सांसदः डा॰. राजीव-भारद्वाजः, मण्डी-सांसदा कङ्गना-रणौत-महोदया, राज्यसभा-सांसदः हर्ष-महाजन-महोदयश्च उपस्थिताः आसन्। ततः पूर्वं केन्द्रीयमन्त्रिणा बिलासपुर-उपायुक्त-कार्यालये समग्राणां राष्ट्रिय-परियोजनानां समीक्षां कृत्वा राज्य-सर्वकाराय समयबद्ध-रूपेण कार्याणि समापयितुं निर्देशः प्रदत्तः।



हिमाचलप्रदेशे संस्कृतविद्यासंवर्धने श्रीवीरभद्रसिंहस्य योगदानम्

©वत्सदेशराजशर्मा संस्थापकाध्यक्षो वैदिकगणःभारतम्

हिमगिरिशिखरशोभितदेवदारुद्रुमदलच्छायाच्छादितनिर्झरनिनादमुखरितदेवभूमिभिधानहिमाचलप्रदेशे सुरभारती भारतीयसंस्कृतेः सनातनी सरस्वती, वैदिकविद्यायाः विमला वाहिनी, सर्वशास्त्रसम्पदः समृद्धिरूपिणा, संस्कारसौरभस्रोतश्च समुज्ज्वलति। अस्याः सुरवाण्याः समुद्धारे संवर्धने च यदा यदा शासनसदिच्छाशिक्षणसातत्यसंस्कृतसेवाव्रतसङ्कल्पाः परस्पराश्लिष्टाः भवन्ति, तदा तदा प्राचीनविद्याप्रदीपः पुनरुज्ज्वाल्यते, परम्परायाः पावनप्रवाहः विशदतरं प्रवर्धते, ज्ञानगौरवगरिमा च जनमानसेषु नितरामुन्मिषति। अस्मिन्नेव संस्कृतिसमुज्ज्वले हिमवद्भूभागे स्वर्गीय-श्रीवीरभद्रसिंहः मुख्यमन्त्रिपदमलङ्कुर्वन् संस्कृतविद्यायाः संरक्षणसंवर्धनसंस्थागतसुदृढीकरणेषु कतिपयानि अतीव महत्त्वपूर्णादिकार्याणि समाचरत्। तदीयासु संस्कृतशिक्षासम्बद्धासु विविधप्रवृत्तिषु शिमलानगरस्थफागलीधरायल-विराजितनेहरूराजकीयसंस्कृतमहाविद्यालयस्य स्तरोन्नयनप्रक्रिया विशेषतः स्मरणीया। तन्महाविद्यालयवृत्तान्तानुसारं वीरभद्रसिंहनेतृत्वे १९९६ तमे खीष्टाब्दे पूर्णकालिकमहाविद्यालयरूपेण समुन्नयनाय नियमावलीनिर्माणस्याधिकारिकः समादेशः निर्गमितः, १९९९ तमे वर्षे च सोऽयं स्तरोन्नयनविधिः सम्यक् सम्पन्नः। पुनः २०१६ तमे वर्षे तेनैव महात्मना तदीयनूतनप्राङ्गण-भवननिर्माणस्य शिलान्यासकर्म परिगृहीतम्। एषः प्रयासः संस्कृताध्ययन-अध्यापनयोः संस्थागताधारं सुदृढीकर्तुं सर्वथा महत्त्वपूर्णः सोपानः अभवत्। न केवलं महाविद्यालयीयभवननिर्माणे, अपि तु प्राच्यज्ञानसंरक्षणप्रसारणयोः तदीया विशदाभिरुचिः सुस्पष्टं प्रकटीकृता। २०१७ तमस्य वर्षस्य जनवरीमासे समाहूतायाः हिमाचलप्रदेशसंस्कृत-अकादम्याः उच्चस्तरीयसभायां सः प्राचीनसंस्कृतपाण्डुलिपीनां हिन्दीभाषायाम् आशु-अनुवादकार्यं सम्पादयितुं बलवतीं प्रेरणां दत्तवान्। फागलीस्थसंस्कृतमहाविद्यालयनिर्माणकार्यं शीघ्रं समापयितुं पूर्वमेव विनियोजितस्य अष्टकोटिरूप्यकात्मकधनेशस्य सदुपयोगेऽपि तेन विशेषः आग्रहः कृतः। संस्कृतसाहित्यसंवर्धनाय शोधपत्रप्रस्तुतकर्तृणां संस्कृतसाहित्यकाराणां सम्मानार्थं मानधनप्रदाननिर्णयोऽपि तस्यामेव सभायां परिगृहीत। एते समारम्भाः संस्कृतभाषां केवलं पाठ्यपुस्तकपरिसरे अनवरुध्य पाण्डुलिपिसंरक्षणसाहित्यसंवर्धनशास्त्रज्ञानप्रसारादि-व्यापकक्षेत्रेषु प्रतिष्ठापयितुं तदीयसंस्कृतप्रेमाणं प्रकाशयन्ति। संस्कृतशिक्षाप्रसारे विद्यार्थिनां मानसानुकूल्यं छात्रवृत्तिप्रदानञ्च अतीव महत्त्वपूर्णं स्थानमलङ्करुतः। हिमाचलप्रदेशस्य आर्थिक-सर्वेक्षणे संस्कृतविषये उत्कृष्टाङ्कभाजं विद्यार्थिनां कृते छात्रवृत्तिव्यवस्था समुल्लिखिता अस्ति। नवम-दशम-कक्षाणां छात्रेभ्यः प्रतिमासं द्विशत-पञ्चाशद्रूप्यकाणि, एकादश-द्वादश-कक्षाणां मेधाविभ्यश्च प्रतिमासं त्रिशतरूप्यकाणि प्रदातुं व्यवस्था आसीत्, यदि ते संस्कृतविषये प्रथमस्थानं प्राप्य न्यूनातिन्यूनं षष्टिप्रतिशताङ्कान् अर्जयन्ति स्म। एषा योजना संस्कृताध्ययनस्य प्रोत्साहनाय महत्त्वपूर्णा आसीत्; तथापि अस्याः सम्पूर्णमभिश्रेयः केवलं वीरभद्रसिंहशासनाय अर्पयितुम् उपलब्धैः प्रमाणैः न शक्यते। वीरभद्रसिंहस्य संस्कृतसम्बद्धा दृष्टिः न तु केवलं भवनभित्तिषु पदप्रतिष्ठासु वा पर्यवस्यति स्म; अपि तु प्राचीनज्ञानपुनरुद्धारः, हस्तलिखितग्रन्थरक्षणम्, संस्कृतसाहित्यकारसम्मानः, शास्त्रपरम्परा-पुनःप्रकाशनञ्च तदीयविचारविमर्शेषु मुख्यस्थान-मभजन्त। संस्कृतभाषा हि न केवलं व्याकरणविभूषिता वाणी, न वा केवलं काव्यकलाकौशलकोषः, अपि तु भारतीय-दर्शनदीपः, धर्मनीतिदर्पणः, ज्ञानविज्ञानपरम्परायाः अक्षयकोशश्च। अतः अस्याः सुरभारत्याः संरक्षणं वस्तुतः संस्कृतेः संरक्षणम्, संस्काराणां संवर्धनम्, स्वकीयसनातनाम्नायपरम्परायाः सम्माननञ्च भवति।एवमेव फागलीस्थसंस्कृतमहाविद्यालय-स्तरोन्नयनात् आरभ्य नूतनभवनशिलान्यास-पर्यन्तम्, प्राचीनपाण्डुलिप्यनुवादप्रेरणात् आरभ्य संस्कृतसाहित्यकारप्रोत्साहनपर्यन्तम्, वीरभद्रसिंहस्य संस्कृतशिक्षासम्बद्धाः प्रवृत्तयः हिमाचलप्रदेशस्य शास्त्रीयविद्यापरम्परायाः संवर्धनप्रयत्नेषु चिरस्मरणीयं स्थानं दधते। तथापि तदीयसम्पूर्णकार्यकालस्य सम्यगवलोकनाय संस्कृतशिक्षकनियुक्तीनाम्, महाविद्यालयानां विकासात्मकविवरणानाम्, छात्रवृत्तिवितरणस्य, वित्तीयव्ययस्य च विस्तृताः अभिलेखाः अपेक्षिताः। ऐतिहासिकप्रमाणाधारितं मूल्याङ्कन-मेव कस्यचित् शासकस्य योगदानं यथार्थतया प्रकाशयति।



अंशविपणिसमाचारः

भारतीयांशविपण्यां तीव्रा वृद्धिः। सेन्सेक्स- निफ्टी- सूचकाङ्कयोः उत्थानम्, निवेशकानां सम्पत्तौ पञ्चलक्षकोटिरूप्यकाणां वृद्धिः

हिमसंस्कृतवार्ताः- डॉ विमलेश झा, मुम्बई

भारतीयांशविपण्यां शुक्रवासरे उल्लेखनीया वृद्धिः अभवत्। पूर्वेषु व्यवसायसत्रेषु अनुभूतायाः तीव्रायाः अवनतेः अनन्तरं विपण्यां पुनरुत्थानं दृष्टम्। अस्य परिणामस्वरूपं निवेशकानां सम्पत्तौ प्रायः पञ्चलक्षकोटिरूप्यकाणां वृद्धिः अभवत्।

बीएसई- सेन्सेक्स- सूचकाङ्कः ८७९.०९ अङ्कैः, अर्थात् १.२३ प्रतिशतं वर्धमानः, ७२,४७२.३३ इति स्तरे व्यवसायस्य समापनम् अकरोत्। तथैव राष्ट्रियशेयरविपण्याः निफ्टीपञ्चाशत्सूचकाङ्कः २८८.६५ अङ्कैः, अर्थात् १.३० प्रतिशतं वर्धमानः, २२,५२०.४५ इति स्तरे आगच्छत्। टाटा कन्सल्टेन्सी सर्विसेज (टीसीएस) इत्यादीनां प्रमुखसूचना- प्रौद्योगिकीसंस्थानां त्रैमासिक-वित्तीयपरिणामाः तथा कृत्रिमबुद्धिमत्तायाः (एआई) सम्बद्ध आयस्य वृद्धिः विपण्याः उत्थाने महत्त्वपूर्णं योगदानम् अकुर्वन्। एतेन निवेशकानां विश्वासः वर्धितः तथा अंशक्रयणस्य प्रवृत्तिः प्रबला अभवत्।

अन्तर्राष्ट्रीयविपण्यां ब्रेन्टप्रकारकस्य अपरिष्कृत-तैलस्य मूल्येषु न्यूनता, ईरानदेशं प्रति सम्भावित-सैन्यक्रियाकलापविषये अमेरिकादेशस्य राष्ट्रपतेः डोनाल्डट्रम्पस्य मृदुदृष्टिः वैश्विकविपणिषु सकारात्मकं वातावरणम् अजनयत्। एतासां घटनानां प्रभावः भारतीयांशविपण्याम् अपि दृश्यते स्म। पूर्वेषु व्यवसायसत्रेषु व्यापकविक्रयणस्य अनन्तरं निवेशकैः पूर्वं विक्रीतानाम् अंशानां पुनः क्रयणं कृतम्। एषा प्रक्रिया शॉर्टकवरिङ्ग् इति नाम्ना ज्ञायते। अस्याः प्रक्रियायाः कारणेन विपण्यां क्रयमागः वर्धितः, सूचकाङ्कयोः वृद्धौ च योगदानम् अभवत्। भारतीयांशविपण्यां दृष्टम् एतत् पुनरुत्थानं निवेशकानां कृते सुखकारकं सिद्धम् अभवत्। सेन्सेक्स-निफ्टी-सूचकाङ्कयोः वृद्ध्या विपण्यां सकारात्मकः मनोभावः पुनः सुदृढः अभवत्। तथापि आगामिषु व्यवसायसत्रेषु वैश्विक-आर्थिकपरिस्थितयः, अपरिष्कृततैलस्य मूल्यपरिवर्तनानि, विदेशीसंस्थागतनिवेशकानां गतिविधयः, प्रमुखसंस्थानां वित्तीयपरिणामाः विपण्याः दिशां निर्धारयिष्यन्ति।

महाराष्ट्र-शासनस्य पक्षतः कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालये ‘अभिजात-मराठी-भाषा-सप्ताहस्य’ अवसरे विशेष-कार्यक्रमस्य आयोजनम्

- **उच्च-तथा-तन्त्रशिक्षा-मन्त्रिणः चन्द्रकान्तदादा-पाटिलस्य तथा च उद्योग-मराठीभाषा-मन्त्रिणः उदय-सामन्तस्य प्रमुखा उपस्थितिः**

हिमसंस्कृतवार्ता — डॉ रेणुका बोकारे, रामटेकम्। महाराष्ट्र-शासनस्य मराठी-भाषा-विभागस्य तथा च कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य (रामटेकम्) संयुक्त-तत्त्वावधाने आयोज्यमानस्य ‘अभिजात-मराठी-भाषा-सप्ताह–२०२६’ इत्यस्य अन्तर्गतं रविवासरे, ११ अक्टूबर् २०२६ दिनाङ्के एकस्य विशेष-कार्यक्रमस्य आयोजनं कृतम् अस्ति। अयं कार्यक्रमः मध्याह्ने द्वादश-वादने (१२:००) विश्वविद्यालय-परिसर-स्थिते ‘डा॰. कमलाकर-तोतडे-सभागारे’ सम्पत्स्यते। अस्मिन् कार्यक्रमे महाराष्ट्र-राज्यस्य माननीयः उच्च-तथा-तन्त्रशिक्षा-मन्त्री श्रीचन्द्रकान्तदादा-पाटील-महोदयः तथा च उद्योग-मराठीभाषा-मन्त्री श्रीउदय-सामन्त-महोदयः प्रमुख-अतिथिरूपेण समुपस्थितौ स्थास्यतः। कार्यक्रमस्य अध्यक्षतां कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य कुलगुरुः डा॰. अतुल-वैद्य-महोदयः विधास्यति। संस्कृत-संस्कृतेतर-साहित्य-सङ्कायस्य अधिष्ठात्री प्रो. कविता-सुनील-होले-महोदया विशिष्टातिथिरूपेण समुपस्थास्यति।

मराठी-भाषायाः समृद्ध-परम्परायाः संरक्षणं सङ्कल्पः

मराठी-भाषया प्राप्तं ‘शास्त्रीय-भाषायाः’ (अभिजात-भाषायाः) गौरवम्, अस्याः समृद्धां साहित्यिक-परम्परां, सांस्कृतिक-धरोहरं, तथा च भाषायाः संरक्षण-संवर्धनाय आवश्यक-प्रयासानां प्रति जन-जागरूकता-प्रसारणम् अस्य सप्ताहस्य प्रमुखम् उद्देश्यं वर्तते। एतादृशैः आयोजनैः मराठी-भाषायाः समृद्ध-परम्परां नव-सन्ततिं प्रति प्रापणेन सह भाषा-साहित्य-संस्कृतीनां मध्ये पारस्परिक-सम्बन्धं सुदृढीकर्तुं यत्नः विधीयते।

आयोजकानाम् उपस्थिति-आह्वानम्

अस्य कार्यक्रमस्य आयोजने विश्वविद्यालयस्य परिसर-सञ्चालकस्य प्रो. हरेकृष्ण-अगस्ती-महोदयस्य, संस्कृतभाषा-साहित्य-विभागस्य विभागाध्यक्षस्य प्रो. पराग-जोशी-महोदयस्य, तथा च कुलसचिवस्य डा॰. रोशन-अलोने-महोदयस्य विशिष्ट-सहयोगः प्राप्यते। कार्यक्रमस्य संयोजनं संस्कृतभाषा-साहित्य-विभागस्य डा॰. राजेन्द्र-जैन-महोदयः करोति।

आयोजकैः रामटेकस्य नागरिकाः, साहित्य-रसिक-जनाः, विद्यार्थिनः, शोधच्छात्राः, भाषाविदश्च अस्मिन् सांस्कृतिक-कार्यक्रमे महत्या संख्यया उपस्थिताः भवेयुः इति सस्नेहम् आह्वानं कृतम्।

सर्वकारीययोजनानां लाभः, निःशुल्क-विधिकसहायता च सामान्यजनानां कृते उपलभ्यते

हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः, सिद्धार्थनगरम्। उत्तरप्रदेशस्य सिद्धार्थनगरजनपदे आगामी नवम्बरमासस्य प्रथमदिनाङ्के बृहद् विधिक- सहायतामेलायाः सेवाशिविरस्य च आयोजनं भविष्यति। एतस्य आयोजनं जनपद-विधिकसेवा- प्राधिकरणस्य तत्त्वावधाने लोहिया कलाभवने सिद्धार्थनगरे भविष्यति। अस्मिन् शिविरे सामान्यजनाः सर्वकारीयकल्याणकारीयोजनानां लाभं निःशुल्कविधिकसहायतां च प्राप्तुं शक्नुवन्ति। राष्ट्रियविधिक- सेवाप्राधिकरणस्य, नवदिल्लीस्थस्य, निर्देशानुसारं, उत्तरप्रदेश-राज्यविधिकसेवा- प्राधिकरणस्य, लखनऊस्थस्य, अनुमोदनेन २०२६ तमस्य वर्षस्य नवम्बरमासस्य प्रथमदिनाङ्के, रविवासरे, जनपदस्तरीयस्य अस्य बृहद् विधिकसहायताशिविरस्य आयोजनं करिष्यते। अस्य शिविरस्य प्रमुखम् उद्देश्यम् अस्ति यत् सामान्यजनाः, विशेषतः निर्बलाः, निर्धनाः, दिव्याङ्गजनाः, महिलाः, बालकाः, असङ्गठितक्षेत्रस्य श्रमिकाः, अनुसूचितजातीनां अनुसूचितजनजातीनां च जनाः स्वाधिकारान् जानीयुः, सर्वकारीय- कल्याणकारीयोजनानां च लाभं सरलतया प्राप्नुयुः।

शिविरस्य प्रमुखविशेषताः सुविधाश्च

१. विभिन्नसर्वकारीय-विभागानां सहभागिता-

शिविरे समाजकल्याणविभागस्य, महिला-बालविकास- विभागस्य, श्रमविभागस्य, स्वास्थ्यविभागस्य, कृषिविभागस्य, दिव्याङ्ग-सशक्तीकरणविभागस्य, पञ्चायतीराजविभागस्य, राजस्वविभागस्य, शिक्षाविभागस्य, पुलिसविभागस्य, वित्तकोषानां, ऋणयोजना-सम्बद्धविभागानां च सहायता-केन्द्राणि स्थापितानि भविष्यन्ति।

२. कल्याणकारी- योजनानां लाभः-

शिविरे आयुष्मान् आरोग्यकार्डस्य, मुख्यमन्त्रि-कन्यासुमङ्गला- योजनायाः, वृद्धावस्थापेन्शनस्य, निराश्रित- महिलापेन्शनस्य, दिव्याङ्गजन-पेन्शनस्य, कृषकदुर्घटना- बीमायोजनायाः, श्रमिक- पञ्जीकरणस्य च आवेदनानि स्वीकृतानि भविष्यन्ति। आवश्यकानाम् औपचारिकतानां पूर्तये अपि सहायता प्रदास्यते।

३. निःशुल्कस्वास्थ्यपरीक्षणम्-

शिविरे विशेषज्ञैः चिकित्सकैः स्वास्थ्यपरीक्षणं, नेत्रपरीक्षणं, दन्तपरीक्षणं, सामान्य-चिकित्सकीय- परीक्षणं च निःशुल्कं करिष्यते। रक्तसमूहपरीक्षणस्य सुविधा अपि उपलब्धा भविष्यति।

४. उपकरणानां सहाय्य-सामग्रीणां च वितरणम्-

चिह्नितेभ्यः लाभार्थिभ्यः आवश्यकानाम् उपकरणानां वितरणं करिष्यते। विभिन्नासु कल्याणकारीयोजनासु सम्बन्धितानि लाभपत्राणि सहाय्यसामग्रीश्च नियमानुसारं वितरिष्यन्ते।

जनसामान्याय विशेषम् आह्वानम्

जनपदविधिकसेवाप्राधिकरणं सिद्धार्थनगरम् जनपदस्य सर्वान् निवासिनः, जनप्रतिनिधीन्, स्वयंसेवीसंस्थानां प्रतिनिधीन्, समाजसेविनः आह्वयति यत् ते २०२६ तमस्य वर्षस्य नवम्बरमासस्य प्रथमदिनाङ्के लोहिया कलाभवने आयोजिते अस्मिन् बृहति शिविरे अधिकाधिक-सङ्ख्यया भागं गृह्णीयुः। अस्य शिविरस्य माध्यमेन जनाः सर्वकारीययोजनानां लाभं निःशुल्क-विधिकसहायतां च प्राप्य लाभान्विताः भवितुं शक्नुवन्ति। अतः सर्वेषां जनानां सहभागिता अपेक्षिता अस्ति।

स्वतन्त्र-निष्पक्ष-निर्वाचनं लोकतन्त्रस्य आधारशिला; मतस्य सुरक्षा निष्पक्ष-गणना च निर्वाचन-आयोगस्य उत्तरदायित्वम् उप-मुख्यमन्त्री मुकेश-अग्निहोत्री

हिमसंस्कृतवार्ता — ऊना।

हिमाचलप्रदेशस्य उप-मुख्यमन्त्री मुकेश-अग्निहोत्री-महोदयः अवदत् यत् लोकतान्त्रिक-व्यवस्थायां जनतैव सर्वोपरि वर्तते, तस्याः मतस्य सुरक्षा तथा च निष्पक्ष-गणनां सुनिश्चितीकर्तुं निर्वाचन-तन्त्रस्य प्रमुखं दायित्वम् अस्ति। ऊना-नगरे काङ्ग्रेस-दलस्य विरोध-प्रदर्शन-काले सः प्रतिपादितवान् यत् मतदाता-सूचीः निर्वाचन-प्रक्रियां चाधिकृत्य ये प्रश्नाः उत्थाप्यन्ते, तेषां पारदर्शि-रीत्या समाधानं दातव्यम्।मण्डल-काङ्ग्रेस-अध्यक्षस्य देशराज-गौतमस्य अध्यक्षतायां समायोजिते अस्मिन् कार्यक्रमे हिमाचल-काङ्ग्रेस-प्रभारिणी राज्यसभा-सांसदा च रजनी-पाटिल-महोदया, प्रदेश-काङ्ग्रेस-उपाध्यक्षः भूतपूर्व-विधायकश्च सतपाल-रायजादा, दलस्य अन्ये च सम्बद्धाः विधायकाः वरिष्ठाः नेतारश्च उपस्थिताः आसन्। मुकेश-अग्निहोत्री-महोदयः प्रोक्तवान् यत् स्वतन्त्रं निष्पक्षं च निर्वाचनं लोकतन्त्रस्य आधारशिला भवति। मतदातृणां मनसि स्व-मताधिकारं प्रति कापि आशङ्का न भवेत्। निर्वाचन-प्रक्रियायां पारदर्शकता उत्तरदायित्वं च लोकतन्त्राय अनिवार्ये स्तः। सः अवदत् यत् हिमाचलप्रदेश-काङ्ग्रेस-पक्षः जनतायाः मताधिकारस्य संविधानस्य च रक्षणाय दृढतया सङ्घर्ष-रतः अस्ति। दलेन मतदाता-सूचीनां ‘विशेष-गहन-पुनरीक्षण-प्रक्रियाम्’ (SIR) अधिकृत्य अपि आक्षेपः कृतः। सः स्पष्टीकृतवान् यत् लोकतन्त्रं केवलं मतदान-सञ्चालन-मात्रं नास्ति, अपितु प्रत्येकस्य योग्य-नागरिकस्य मतं सुरक्षितं स्यात् इत्यपि तावदेव महत्त्वपूर्णम् अस्ति।

सिद्धार्थनगरे नवम्बरमासस्य प्रथमदिनाङ्के बृहद् विधिक-सेवाशिविरस्य आयोजनम्

सिद्धार्थनगरे जिलाधिकारीणाम् आदेशः- जिमडीग्रामपञ्चायतस्य प्रशासकपदे सहायक- विकासाधिकारी नियुक्तः निवर्तमानग्रामप्रधानः जहीर अहमदः पदात् अपसारितः।

हिमसंस्कृतवार्ताः:- वृजेश कुमार पाण्डेयः, बस्तीमण्डलम्, उत्तरप्रदेशः

उत्तरप्रदेशस्य सिद्धार्थनगरजनपदे डुमरियागञ्ज-विकासखण्डान्तर्गतस्य जिमडीग्रामपञ्चायते प्रशासकीयव्यवस्थायाः सम्बन्धे जिलाधिकारीणां महत्त्वपूर्णः आदेशः निर्गतः। जिलाधिकारी शिवशरणप्पा जी. एन. इत्येषः निवर्तमानग्रामप्रधानं जहीर अहमदं प्रशासकपदात् अपसार्य सहायकविकासाधिकारी (पञ्चायत) डुमरियागञ्जं ग्रामपञ्चायतस्य प्रशासकरूपेण नियुक्तवान्। प्राप्तादेशानुसारं दिनाङ्कः ५ अक्तूबर २०२६ इत्यस्य निरीक्षणप्रतिवेदने ग्रामपञ्चायते अनेकाः अनियमितताः, विकासकार्येषु शिथिलता, सार्वजनिकसुविधानां दुर्व्यवस्था च प्रकाशिता।

प्रतिवेदने कथितं यत् ग्रामपञ्चायतस्य विभिन्नेषु विकासकार्येषु अपेक्षितं ध्यानं न दत्तम्। निर्मितानि कतिपयानि परिसम्पत्तयः अनुपयोगिनः सन्ति। ग्रामप्रधानस्य अनुपस्थितेः कारणेन पंचायतसहायकस्य सामुदायिकशौचालयस्य सहायकस्य च मानदेयस्य भुगतानं न जातम्। पंचायतभवनं गन्तुं मार्गेषु समस्या विद्यते। डिजिटल- पुस्तकालयस्य निर्माणं कृतम्, परन्तु तस्य समुचितः उपयोगः न भवति। सामुदायिक-शौचालयमपि क्रियाशीलं नास्ति।

प्रतिवेदने अन्येऽपि दोषाः उल्लिखिताः। आरआरसीकेन्द्रस्य निर्माणं कृत्वा तत् अनुपयोगिनः अवस्थायां परित्यक्तम्। तेषां समीपे जलभरणस्य समस्यापि विद्यते। आङ्गनवाडीकेंद्रस्य परितः जलभरणस्य कारणेन आवागमनं दुष्करं जातम्। एतैः कारणैः विकासकार्येषु अपेक्षितं फलम् न प्राप्तम्। जिलाधिकारीणां निरीक्षणप्रतिवेदने स्पष्टं कृतं यत् निवर्तमानग्रामप्रधानः जहीर अहमदः ग्रामपञ्चायतस्य प्रशासकस्य दायित्वं सम्यक् न निर्वहति स्म। तस्य अनुपस्थितेः कारणेन ग्रामपञ्चायतस्य कार्याणि बाधितानि अभवन्। यदि सः स्वदायित्वं सम्यक् निर्वहति स्म, तर्हि एतादृशी स्थितिः न उत्पद्येत।

अतः उत्तरप्रदेशशासनस्य पञ्चायतीराजविभागस्य शासनादेशयोः अनुपालनं कुर्वन् जिलाधिकारी जहीर अहमदं प्रशासकपदात् अपसारितवान्। सहायकविकासाधिकारी (पञ्चायत) डुमरियागञ्जं जिमडीग्रामपञ्चायतस्य प्रशासकपदे नियुक्तवान्। आदेशः तत्कालप्रभावेण प्रवर्तते



डीपीएस बोकारो विद्यालये दृश्यकला- प्रतियोगितायाः आयोजनं, छात्रप्रतिभानां बहुविधं प्रकटीकरणम्

हिमसंस्कृतवार्ताः:- सौरभः दे, बोकारो।ललितकलाः छात्राणां मनसि हृदये च निहितां सृजनात्मकप्रतिभां प्रकटीकुर्वन्ति। दिल्ली- पब्लिक- स्कूल- बोकारो-विद्यालये आयोजितायाम् अन्तःसदनीय- दृश्यकला- प्रतियोगितायां षण्णां सदनानां २५० तः अधिकैः छात्रैः उत्साहपूर्वकं भागं गृहीत्वा स्वकीयं कलाकौशलं सृजनशीलता च प्रदर्शिता। विविधकलाविधीनां माध्यमेन विद्यालयस्य प्राङ्गणं कलात्मकप्रतिभानां मनोहरमञ्चत्वेन परिणतम्।प्रतियोगितायां मुखचित्रणं, रङ्गवल्ली-निर्माणं, भित्तिपत्रनिर्माणं, तत्क्षणचित्राङ्कनम्, मृत्तिकाशिल्पनिर्माणं सुलेखनम् इत्यादीनि विविधानि स्पर्धाक्षेत्राणि आसन्। विश्वशान्तेः, पर्यावरणसंरक्षणस्य, नशामुक्तसमाजस्य च महत्त्वं युववर्गं प्रति प्रसारयितुम् एताः स्पर्धाः आयोजिताः। 'नशायै नकारः', 'युद्धाय न, प्रेम्णे धर्मः', 'शान्तिः', 'पौराणिककथाः कल्पनाश्च', 'विद्यालयस्य गौरवपूर्णस्य चत्वारिंशद्वर्षीययात्रायाः', 'मम देशः, मम जनाः' इत्यादिषु राष्ट्रिय-सामाजिक- महत्त्वयुक्तेषु विषयेषु प्रतिभागिभिः उत्कृष्टा सृजनशीलता प्रदर्शिता।

विद्यालयस्य प्राचार्यः डॉ. ए. एस. गङ्गवारः छात्राणां कलात्मककौशलम् अवलोक्य तैः सह संवादमपि अकरोत्। भाविनां वैश्विकनागरिकाणां दृष्टिकोणं, कल्पनाशक्तिं तथा सुरक्षित-शान्तिपूर्णविश्वनिर्माणे तेषां संवेदनशीलतां च सः प्रशंसितवान्। सः अवदत्- "कलायाः आकर्षणं शाश्वतम् अस्ति; सा अभिव्यक्तेः सर्वाधिकं प्रभावशालि माध्यमम् अस्ति।"



सोलने शत-कोटि-रूप्यकाणां व्ययेन निर्मास्यते अङ्गदान-केन्द्रम्; 'न्यू-कथेड़'-चिकित्सालये निर्मीयते रूपरेखा

हिमसंस्कृतवार्ता — सोलनम्।

हिमाचलप्रदेशस्य सोलन-मण्डलं साम्प्रतं परोपकाराय अङ्गदानं कृत्वा अन्येषां जीवनानां रक्षणे समर्थं भविष्यति। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य निर्देशानुसारं मण्डल-मुख्यालये शत-कोटि-रूप्यकाणां (₹१०० कोटि) व्ययेन विशिष्ट-चिकित्सालये (Super Specialty Hospital) अङ्गदान-केन्द्रं सज्जं क्रियते। प्रदेशस्य द्वितीयस्य अङ्गदान-केन्द्रस्य स्थापनाय योजनायां कार्यं तीव्रगत्या प्रचलति। एतस्य केन्द्रस्य आरम्भात् परम् अङ्गदानम् इच्छुकानां जनानां कृते पञ्जीकरणस्य आवश्यक-सूचना-प्राप्तेश्च सौविध्यं स्थानिक-स्तरे एव समुपलब्धं भविष्यति।

स्वास्थ्य-विभागेन चिकित्सालय-प्रबन्धनेन च अस्य प्रकल्पस्य कृते प्रारम्भिकी रूपरेखा सज्जीक्रियते। अस्य प्रस्तावित-केन्द्रस्य आरम्भात् परं सोलनस्य समीपवर्तिनां क्षेत्राणां च नागरिकाः अङ्गदान-सम्बद्धां प्रक्रियां स्थानीयरूपेण एव पूरयितुं शक्ष्यन्ति। सम्प्रति राज्ये इयं मुख्या सुविधा केवलं शिमला-स्थिते 'आईजीएमसी' (IGMC) चिकित्सालये एव उपलभ्यते। तस्याम् एव पंक्तौ अधुना सोलन-नगरे अपि एषा सुविधा विकस्यते।

आधुनिक-स्वास्थ्य-सुविधाभिः सम्पन्नः भविष्यति 'न्यू-कथेड़'-चिकित्सालयः

स्वास्थ्य-विभागस्य मतानुसारं 'न्यू-कथेड़'-क्षेत्रे निर्मीयमाणः विशिष्ट-चिकित्सालयः अत्याधुनिक-वैद्यक-उपकरणैः सज्जः भविष्यति। अस्मिन् चिकित्सालये— आघात-केन्द्रम् (Trauma Centre), आकाशयान-अवतरण-स्थलम् (Helipad), अङ्गदान-इच्छुक-नागरिकाणां कृते निर्धारित-प्रक्रियानुसारं पञ्जीकरण-व्यवस्था, विविधाः उच्च-स्तरीयाः नैदानिक-सुविधाश्च प्रस्तावितः सन्ति।

स्वास्थ्यमन्त्री डा. शाण्डिलः करोति निरीक्षणम्; एप्रिल्-मास-पर्यन्तं प्रथम-चरणस्य लक्ष्यम्

प्रदेशस्य स्वास्थ्यमन्त्री डा॰. कर्नल धनीराम-शाण्डिल-महोदयः इमां योजनां राज्यस्य महतीं परियोजनां मत्वा समये-समये निर्माण-कार्यस्य प्रत्यक्षं निरीक्षणं करोति। स्वास्थ्य-विभागस्य निर्देशानुसारम् अस्य चिकित्सालयस्य प्रथम-चरणस्य कार्यम् एप्रिल्-मास-पर्यन्तं सम्पूरयितुं लक्ष्यं निर्धारितम् अस्ति। तदनन्तरं द्वितीय-चरणे अन्यासां विशिष्ट-सुविधानां विस्ताराय कार्यं प्रारप्स्यते।

दिल्ली-पब्लिक-विद्यालये वाराणस्यां गीतायाः रङ्गः, प्रतियोगितायाश्च उत्साहः

- **गीताज्ञानप्रतियोगितया विद्यार्थिषु संस्काराणां, नैतिकमूल्यानां चरित्र-निर्माणस्य च सन्देशः।**



हिमसंस्कृतवार्ताः- वाराणसी।

भारतीयसंस्कृतेः, नैतिकमूल्यानां जीवनप्रबन्धनस्य च शाश्वतसन्देशं नवपीढ्याः समीपं प्रापयितुम् उद्दिश्य वाराणस्यां स्थिते दिल्ली- पब्लिक-विद्यालये महामना-मालवीय-मिशनस्य (काशी-हिन्दू- विश्वविद्यालयः) महामना- संस्कार-पुस्तकालयस्य च संयुक्ततत्त्वावधाने गीताज्ञान-प्रतियोगितायाः, गीताश्लोकगायनप्रतियोगितायाः आयोजनम् अत्यन्तोत्साहपूर्णवातावरणे सम्पन्नम्। अस्मिन् कार्यक्रमे तृतीयकक्षात् अष्टमकक्षापर्यन्तं प्रायः ३२० विद्यार्थिनः सहभागिताम् अकुर्वन्। विद्यार्थिनाम् उत्साहपूर्णसहभागितया भारतीय-ज्ञानपरम्परायां तेषां रुचिः सांस्कृतिकमूल्येषु च तेषां अनुरागः स्पष्टतया अभिव्यक्तः।कार्यक्रमस्य शुभारम्भः मुख्यातिथिना तथा गीताज्ञानप्रतियोगितायाः मुख्यसंयोजकेन श्रीमता अखिलेशकुमारराय-महोदयेन विरचितेन वन्दनागीतेन अभवत्। गीतस्य पङ्क्तिः आसीत्- “जय जय महामना भारत रतन, गीता के ज्ञान से करें वंदन”। कार्यक्रमस्य सञ्चालनं संस्कृताचार्येण सदाशिवतिवारी-महोदयेन, अध्यापिकया सुश्रिया प्रज्ञाशुक्लामहोदयया कृतम्। विद्यार्थिभिः श्रीमद्भगवद्गीतायाः श्लोकानां सस्वरं भावपूर्णं च गायनं प्रस्तुतम्। तेषां प्रस्तुतिं श्रुत्वा मुख्यातिथिः अन्ये अतिथयः शिक्षकाः च विशेषरूपेण प्रभावितः अभवन्। अस्मिन् अवसरे चेतनाविङ्गस्य समन्वयिका श्रीमती सुनिपासान्यालमहोदया विद्यार्थिनां सक्रिय- सहभागितायाः प्रशंसाम् अकरोत्। सा अवदत् यत् विद्यार्थिनां गीतायां प्रबलरुचिः अस्याः प्रतियोगितायाः सफलतायाः सूचिका अस्ति। एतादृशाः कार्यक्रमाः नवपीढीं स्वकीय- सांस्कृतिकमूलैः सह संयोजयन्ति तथा तेषां नैतिकविकासे, चरित्रनिर्माणे, संस्कारवर्धने च महत्त्वपूर्णां भूमिकां निर्वहन्ति। आधुनिके अङ्कीय-प्रौद्योगिकीप्रधानयुगे विद्यार्थिनः शाश्वतजीवनमूल्यैः परिचिताः भवेयुः- इति दृष्ट्या एतादृशानां प्रयासानाम् अत्यधिकं महत्त्वम् अस्ति।मुख्यातिथिः अखिलेशकुमारारायमहोदयः ओमानदेशस्य स्वास्थ्यमन्त्रालये मुख्य- औषधनिर्माण-विशेषज्ञपदेन कार्यरतः अस्ति। सः गीताज्ञानस्य, भारतीयसंस्काराणां मानवीयमूल्यानां च प्रचारप्रसारे निरन्तरं सक्रियः अस्ति। स्वसम्बोधने सः अवदत् यत् श्रीमद्भगवद्गीता केवलं धार्मिकः ग्रन्थः न, अपि तु जीवनस्य सम्यगवबोधाय, विविधसमस्यानां समाधानाय, विवेकपूर्णनिर्णयग्रहणाय च प्रेरणां प्रददाति। अतः गीता जीवनप्रबन्धनस्य विज्ञानम् इति वक्तुं शक्यते। एतदेव विचारं केन्द्रे निधाय अस्य वर्षस्य प्रतियोगितायाः विषयः “जीवनप्रबन्धनस्य विज्ञानम्” इति निर्धारितः अस्ति।रायमहोदयः अवदत् यत् अद्य अस्माकं देशे ज्ञानविज्ञानक्षेत्रयोः प्रतिभानां न अभावः, तथापि ज्ञानेन सह चरित्रस्य, संवेदनशीलतायाः, नैतिकतायाश्च समन्वयः समानरूपेण आवश्यकः अस्ति। यदि गीतायाः सन्देशाः बालकानां जीवनस्य संस्काररूपेण आत्मबलरूपेण च विकसिताः भवन्ति, तर्हि ते कठिनपरिस्थितिष्वपि समुचितनिर्णयान् ग्रहीतुं समर्थाः, उत्तरदायिनः चरित्रवन्तश्च नागरिकाः भवितुम् अर्हन्ति। गीताज्ञानं बालकानां कृते जीवनोपयोगि आधाररूपेण कार्यं करोति, यत् तान् आन्तरिकरूपेण सुदृढान् कृत्वा राष्ट्रनिर्माणे योगदानाय प्रेरयति। “एकं भारतम्, श्रेष्ठं भारतम्, विकसितं भारतम्” इति सङ्कल्पस्य सिद्धये नवपीढ्यां नैतिकचेतनायाः राष्ट्रभावनायाश्च विकासः अत्यावश्यकः इति सः प्रतिपादितवान्।महामना- पण्डित- मदनमोहन-मालवीय- महोदयस्य शैक्षिकदृष्टेः उल्लेखं कुर्वन् रायमहोदयः अवदत् यत् काशीहिन्दू-विश्वविद्यालयस्य संस्थापकः भारतरत्न- महामना-मालवीयमहोदयः विद्यार्थिनः गीतायाः स्वाध्यायार्थं सदैव प्रेरयति स्म। तस्य आदर्शेभ्यः प्रेरणां प्राप्य गीताज्ञानं अधिकाधिक- विद्यार्थिनां समीपं प्रापयितुं प्रयासः क्रियते। अस्यैव क्रमस्य अन्तर्गतं वाराणसीनगरे शतविद्यालयेषु गीताज्ञान-प्रतियोगितायाः आयोजनस्य योजना अस्ति। एतावता पञ्चाशीतिः विद्यालयाः अस्यां प्रतियोगितायां सहभागितायै पञ्जीकरणं कारितवन्तः।कार्यक्रमे विशिष्टातिथिरूपेण काशी-हिन्दू- विश्वविद्यालयस्य सेवानिवृत्तः सहायककुलसचिवः डॉ. नरेशचन्द्र-पाण्डेयमहोदयः उपस्थितः आसीत्। विद्यालयस्य प्रधानाचार्या मुनमुनसेनगुप्तामहोदया, उपप्रधानाचार्या रोली-मनखण्डमहोदया, जिज्ञासाविङ्गस्य समन्वयिका प्रियंकारॉय चौधरीमहोदया, सहशैक्षणिक-गतिविधीनां प्रमुखा काकुली-मुखर्जी-महोदया, विद्यालयस्य शिक्षकाः शिक्षिकाश्च विद्यार्थिनः भारतीयज्ञानपरम्परया सह संयोजयितुं क्रियमाणस्य अस्य प्रयासस्य प्रशंसाम् अकुर्वन्।मुख्यातिथिः अखिलेशकुमारारायमहोदयः विद्यालयप्रशासनस्य, प्रधानाचार्यायाः, समन्वयिकानां, संस्कृताचार्यस्य सदाशिवतिवारी- महोदयस्य, सर्वेषां शिक्षकाणां शिक्षिकाणां च सहयोगस्य प्रयासानां च प्रशंसाम् अकरोत्। सः विद्यालयपरिवारस्य अभिभावकानां च प्रति कृतज्ञतां प्रकटितवान्। कार्यक्रमः एतं सन्देशं प्रदत्तवान् यत् गीतायाः अध्ययनं केवलं श्लोकानां कण्ठस्थीकरणे सीमितं नास्ति, अपितु तस्याः जीवनोपयोगिसन्देशानां स्वाचरणे समावेशः एव तस्याः वास्तविकं साफल्यम् अस्ति। एतादृशाः कार्यक्रमाः विद्यार्थिषु आत्मविश्वासं, अनुशासनं, नैतिकतां सांस्कृतिकचेतनां च वर्धयन्ति तथा तान् सशक्तान्, संवेदनशीलान् उत्तरदायिनश्च नागरिकान् भवितुं प्रेरयन्ति।

जनतायाः मतस्य भवति स्तेयम्; लोकतन्त्र-रक्षणाय काङ्ग्रेस-दलस्य सङ्घर्षः — रजनी-पाटिल



हिमसंस्कृतवार्ताः - ऊना।

काङ्ग्रेस-दलस्य राष्ट्र-व्यापि-विरोध-आह्वानस्य अनुसारेण मण्डल-काङ्ग्रेस-समित्या ऊना-मुख्यालये गुरुवासरे ‘लोकतन्त्रं रक्ष, देशं रक्ष, मतं रक्ष, संविधानं रक्ष’ इत्यभियानान्तर्गतं विशालं विरोध-प्रदर्शनं कृतम्।

सभामेनां सम्बोधयन्ती काङ्ग्रेस-प्रभारिणी रजनी-पाटिल-महोदया अवदत् यत् राहुल-गान्धी-महोदयः सम्प्रति देशस्य, संविधानस्य, जनतायाः च मताधिकार-रक्षणार्थं महन्तं सङ्घर्षं कुर्वन् अस्ति। सा प्रावोचत् यत् पूर्वं राजीव-गान्धी-महोदयस्य नेतृत्वे काङ्ग्रेस-सर्वकारेण मतदान-वयः एकविंशति-वर्षेभ्यः (२१) न्यूनीकृत्य अष्टादश-वर्षं (१८) विहितम् आसीत्, येन देशस्य युवानः लोकतान्त्रिक-प्रक्रियायां सम्भागं कृत्वा स्व-भविष्यं निर्धारयितुं शक्नुयुः।

रजनी-पाटिल-महोदया आरोपम् अकरोत् यत् अद्य तस्यैव मताधिकारस्योपरि प्रहारः क्रियते तथा च जनतायाः मतस्य स्तेयं (चोरी) विधीयते। मतं जनतायाः शक्तिः स्व-सर्वकार-चयनस्य मौलिकः अधिकारश्च वर्तते। काङ्ग्रेस-पक्षः अस्य अधिकारस्य सुरक्षायै राहुल-गान्धी-महोदयस्य नेतृत्वे वीथीभ्यः संसद-पर्यन्तं लोकतान्त्रिक-सङ्घर्षं निरन्तरं चालयिष्यति। सा न्यवेदयत् यत् मतदाता-सूचीषु निर्वाचन-पद्धतौ च उत्पन्नानां संशयानां पारदर्शकतया उत्तरं दीयेत।

चतुःपञ्चाशत्तमं मिथिलाविभूतिपर्व २२-२४ नवम्बरपर्यन्तम् आयोजयिष्यते; साहित्य-सङ्गीत-कलानां त्रिवेणीं प्रवाहयिष्यति त्रिदिवसीयः समारोहः



हिमसंस्कृतवार्ताः राघव नाथ झा

मिथिलायाः महनीयानां विभूतीनां यथोचितसम्मानप्रदानाय तथा भाविपीढीनां कृते तेषां कृतित्वस्य परिचयप्रदानाय प्रतिवर्षम् आयोज्यमानः 'मिथिलाविभूतिपर्वसमारोहः' साहित्य-सांस्कृतिकमहाकुम्भरूपेण मिथिला-मैथिल्योः समुन्नतेः जीवन्तं प्रतीकम् अस्ति। अस्य चतुःपञ्चाशत्तमस्य समारोहस्य आयोजनं नवम्बरमासस्य द्वाविंशतितः चतुर्विंशति-दिनाङ्कपर्यन्तं त्रिदिवसीयरूपेण भविष्यति। अस्मिन् समारोहे साहित्यस्य, सङ्गीतस्य, कलायाश्च त्रिवेणी प्रवहिष्यति।एतद् विद्यापतिसेवासंस्थानस्य महासचिवः डॉ. वैद्यनाथचौधरी 'बैजू' रविवासरे चतुःपञ्चाशत्तमस्य मिथिलाविभूतिपर्वसमारोहस्य आयोजनसमितेः समीक्षोपवेशने प्रतिपादितवान्। तेन उक्तं यत् अस्मिन् वर्षे समारोहस्य माध्यमेन मिथिलायाः सांस्कृतिक-साहित्यिकविरासतायाः संरक्षणाय संवर्धनाय च अनुकूलवातावरणस्य निर्माणेन सह मैथिलीभाषायाः शास्त्रीयभाषारूपेण मान्यताप्राप्तये विशेषः प्रयत्नः विधास्यते।तेन सूचितं यत् अस्मिन् वर्षे मिथिलाचित्रकलायाः पारम्परिकव्यञ्जनानां च प्रदर्शनी आयोजयिष्यते। साहित्याकादम्याः नवदेहलीस्थायाः तथा मैथिल्यकादम्याः पाटलिपुत्रस्थायाः च सौजन्येन आकर्षकस्य पुस्तकप्रदर्शनस्य आयोजनमपि त्रिषु दिवसेषु करिष्यते। तेन प्रतिपादितं यत् अस्मिन् ऐतिहासिके समारोहे नवपीढेः कलाकाराणां कवीनां च प्रतिभाप्रदर्शनाय अधिकावसराः प्रदास्यन्ते। समारोहस्य प्रथमद्वितीयदिवसयोः कविविद्यापतिविरचितानां गीतानां सङ्गीतमय-प्रस्तुतिषु विशेषं प्राधान्यं भविष्यति।

'अर्पण' पत्रिकायाः प्रकाशनम्, कविसम्मेलनस्य च सन्नाहः

समीक्षोपवेशने संस्थानस्य माध्यमसंयोजकः डॉ. प्रवीणकुमारझा अवदत् यत् संस्थानस्य मुखपत्रिकायाः 'अर्पण' इत्यस्याः प्रकाशनाय सम्पादकस्य डॉ. महेन्द्रनारायणरामस्य तथा सहसम्पादकानां सहयोगेन लेखसङ्कलनस्य कार्यं द्रुतगतिना प्रचलति।

वरिष्ठकविना गीतकारेण च डॉ. चन्द्रमणिझा इत्यनेन संयोजकरूपेण तथा डॉ. प्रवीणकुमारझा इत्यनेन सहसंयोजकरूपेण कविसम्मेलनस्य भव्यायोजनाय देशस्य विभिन्नप्रदेशेभ्यः प्रसिद्धानां मैथिलीकवीनां कवयित्रीणां च नामावलिः अन्तिमरूपं प्राप्यते।

शोभायात्रायाः, युवसहभागितायाः, चित्रकलास्पर्धायाश्च सन्नाहः

शोभायात्रासंयोजकः श्रीविनोदकुमारझा चतुःपञ्चाशत्तमस्य समारोहस्य शोभायात्रायाः सन्नाहविषये विस्तृतं विवरणं प्रस्तुतवान्। श्रीआशीषचौधरी युवजनानां प्रत्यक्षसहभागितां सुनिश्चितुं श्रीबालेन्दुझा इत्यनेन सह क्रियमाणानां प्रयत्नानां विवरणं दत्तवान्। श्रीमणिभूषणराजुः अन्तर्राष्ट्रीयमिथिलाचित्रकलास्पर्धायाः विषये विस्तरेण प्रतिपादितवान्।

मैथिलीभाषायाः शास्त्रीयभाषामान्यतायै आग्रहः

मैथिल्यकादम्याः पूर्वाध्यक्षः पण्डितः कमलान्तझा अवदत् यत् जनकस्य, जानक्याः, कविकोकिलस्य विद्यापतेश्च भाषा मैथिली अद्यापि शास्त्रीयभाषारूपेण मान्यतां न प्राप्तवती इति खेदजनकम् अस्ति। केन्द्रसर्वकारस्य घोषणानां तदनुरूपकार्याणां च मध्ये विद्यमानं वैषम्यम् अनेन विषयेन प्रकाशते।तेन प्रतिपादितं यत् मैथिलीभाषायाः शास्त्रीयभाषारूपेण मान्यताप्रदानेन न केवलं मिथिलायाः बिहारस्य च भाषिकविरासतायाः सम्मानः भविष्यति, अपितु मैथिलीसाहित्यस्य प्राचीनग्रन्थेषु निहितस्य ज्ञानभाण्डारस्य परिचयः वैश्विकस्तरे अपि सुलभः भविष्यति।

मैथिलीसेविनां सङ्घटितप्रयत्नाय आह्वानम्

अध्यक्षीयसम्बोधने संस्थानस्य अध्यक्षः प्रो. शशिनाथझा अवदत् यत् मैथिलीभाषायाः शास्त्रीयभाषारूपेण मान्यताप्राप्तये आवश्यकपक्षाणां समावेशेन विस्तृतं प्रतिवेदनं विहितप्रक्रियया केन्द्रसर्वकारस्य समक्षं प्रस्तुतम् अस्ति। राज्यसर्वकारस्य स्तरात् आवश्यकाः प्रक्रियाः सम्पन्नाः सन्ति चेदपि मैथिलीभाषायाः शास्त्रीयभाषारूपेण मान्यता अद्यापि न प्राप्ता इति चिन्तनीयः विषयः अस्ति।तेन कोटिशः मिथिलावासिनां भाषिकास्मितायाः संरक्षणाय तथा मैथिलीसाहित्यस्य उत्तरोत्तरविकासाय सर्वेभ्यः मैथिलीसेविभ्यः सङ्घटनेभ्यः एकस्मिन् मञ्चे समागत्य ऐक्यभावेन प्रयत्नं कर्तुम् आह्वानं कृतम्।

मन्नुचौधरी समारोहस्य स्वागताध्यक्षत्वेन चयनितः

समीक्षोपवेशने सर्वसम्मत्या युवा-समाजसेवी श्रीमन्नुचौधरी समारोहस्य स्वागताध्यक्षत्वेन चयनितः। अस्मिन्नवसरे संस्थानपरिवारस्य पक्षतः सः मिथिलायाः पारम्परिकरीत्या सम्मानितः।उपवेशने डॉ. बुचरूपासवानः, डॉ. दिलीपकुमारझा, प्रो. चन्द्रशेखरझा 'बूढ़ाभाई', डॉ. उदयकान्तमिश्रः, डॉ. महानन्दठाकुरः, प्रो. रामसेवकठाकुरः इत्यादयः अपि स्वकीयाः महत्त्वपूर्णाः विचाराः प्रस्तुतवन्तः।

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

काव्या- नमस्ते नन्दिनि। एका विचित्रा वार्ता मया श्रुता। देहरादूननगरे एकेन चोरेण दूरभाषयन्त्रं चोरितम्। ततः तेन सन्देश-माध्यमेन कूटशब्दः पृष्टः!

नन्दिनी- अहो मूर्खः चोरः! इदानीम् अन्या वार्ता। चीनदेशे एकेन स्वामिना कर्मकरेभ्यः बी. एम. डब्ल्यू.-मोटरयानानि दत्तानि।

काव्या- अतीव उदारः स्वामी! परन्तु तत् किमर्थं तेन कृतम्?

नन्दिनी- शीत-वातावरणात् इति तेन कथितम्! अस्तु, एतत् श्रूयताम्। एकस्मिन् विमानयाने यात्रिभिः अन्न-पेटिकाः हस्तात् हस्तं नीताः।

काव्या- यात्रिणां महान् एकभावः दृष्टः! अन्ते, बागपतनगरे व्यायामशालायां जनैः युद्धं कृतम्।

नन्दिनी- व्यायाम-साधनानि अपि तैः क्षिप्तानि। अतीव खेदजनकम् एतत्। धन्यवादः, पुनर्मेलिष्यामः।

-ईदर धीरजः

विज्ञापनम्

संस्कृत- संस्कृति- विकास- संस्थानेन राष्ट्रीय- ऑनलाइन- संस्कृत-सम्भाषणवर्गः– २०२६ इत्यस्य आयोजनं प्रस्तावितम् अस्ति। अस्मिन् वर्गे संस्कृतभाषायाः सम्भाषणकौशलस्य प्रशिक्षणं प्रदास्यते। प्रशिक्षणं प्राप्तुम् इच्छुकाः अभ्यर्थिनः २१ अक्तूबर २०२६ दिनाङ्कपर्यन्तं प्रदत्ते लिङ्कम् उपरि गत्वा स्वीयम् आवेदनं कर्तुं शक्नुवन्ति।

आवेदनसूत्रम्- https://forms.gle/5tbcjZdpM6Z3FoUf9

अयं वर्गः २५ अक्तूबर तः ३ नवम्बर् २०२६ दिनाङ्कपर्यन्तं प्रतिदिनं सायं ८:०० वादनतः ऑनलाइनमाध्यमेन सञ्चालितः भविष्यति। निर्धारित-मानदण्डानुसारं वर्गं सफलतया पूर्णं कुर्वद्भ्यः प्रतिभागिभ्यः ई-प्रमाणपत्रं प्रदास्यते। भारतस्य सर्वेभ्यः प्रान्तेभ्यः इच्छुकाः छात्राः, शिक्षकाः, संस्कृतप्रेमिणश्च आवेदनं कर्तुं शक्नुवन्ति। अस्य विज्ञापनस्य निरस्तीकरणस्य अथवा अस्मिन् संशोधनस्य पूर्णः अधिकारः आयोजकसंस्थायाः सुरक्षितः अस्ति।



स्वयमेव ट्रैक्टरयानं चालयन् अन्नदातृणां सम्मानार्थं प्रवृत्तः नित्यानन्दरायः

ट्रैक्टरयानस्य स्टेयरिङ्ग-स्थाने नित्यानन्दरायः, हृदये च कृषकसम्मानस्य सङ्कल्पः

त्रिंशतैः ट्रैक्टरैः सह कृषकाणां मध्ये समुपस्थितः केन्द्रीयगृहराज्यमन्त्री नित्यानन्दरायः; स्वयमेव ट्रैक्टरं चालयन् ७६ किलोमीटरमितां यात्रां कृतवान्।

पटना, ०९ अक्टूबर २०२६।
हिमसंस्कृतवार्ताः राघव नाथ झा

प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः सार्वजनिकजीवने जनसेवायाः पञ्चविंशतिवर्षपूर्त्यवसरे प्रवर्तमानस्य 'सेवासङ्कल्पाभियानस्य' अन्तर्गतं रोहतासजनपदस्य दिनारास्थितात् भलुनीभवानीस्थानात् माँमुण्डेश्वरीमन्दिरपर्यन्तं ७६ किलोमीटरमिता भव्यट्रैक्टरयात्रा आयोजिता। अस्यां यात्रायां त्रिंशतानि ट्रैक्टरयानानि भागं गृहीतवन्ति।

अन्नदातृणां सम्मानस्य कृषकहितसंरक्षणस्य च सन्देशं प्रसारयितुं आयोजितस्य 'अन्नदाता-सेवासङ्कल्पयात्रा एवं किसान-संवादकार्यक्रमस्य' उद्घाटनं केन्द्रीयगृहराज्यमन्त्री श्रीनित्यानन्दरायः कृतवान्। कार्यक्रमे बिहारसर्वकारस्य शिक्षामन्त्री श्रीमिथिलेशतिवारी विशिष्टातिथिरूपेण उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षतां भाजपाकिसानमोर्चायाः प्रदेशाध्यक्षः श्रीरामसुमिरनसिंहः कृतवान्। यात्रायाः प्रमुखमाकर्षणं तदा दृष्टम्, यदा केन्द्रीयगृहराज्यमन्त्री श्रीनित्यानन्दरायः स्वयमेव ट्रैक्टरयानस्य स्टेयरिङ्गं गृहीत्वा कृषकैः सह त्रिंशतट्रैक्टरयानानां काफिलेन सार्धं ७६ किलोमीटरमितां यात्रां कृतवान्। अनेन तेन कृषकाणां प्रति सम्मानभावः, तेषां परिश्रमस्य प्रति कृतज्ञता तथा कृषिक्षेत्रस्य समृद्ध्यर्थं स्वकीयः सङ्कल्पश्च अभिव्यक्तः। यात्रायाः समये श्रीरायः अवदत् यत् इयं यात्रा अन्नदातृणां सम्मानस्य, तेषां परिश्रमस्य प्रति कृतज्ञतायाः, कृषिक्षेत्रस्य समृद्धेः सङ्कल्पस्य च सन्देशं जनसामान्यं यावत् प्रापयितुं महत्त्वपूर्णः प्रयासः अस्ति। तेन उक्तं यत् प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः जनसेवायाः पञ्चविंशतिवर्षाणां यात्रा जनसेवायाः दृढसङ्कल्पं प्रतिबिम्बयति। 'सेवा एव सङ्कल्पः, जनकल्याणमेव लक्ष्यम्, राष्ट्रहितमेव सर्वोपरि' इति अस्याः यात्रायाः मूलसन्देशः अस्ति। अद्य प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः नेतृत्वे कृषकाणाम् आयवर्धनाय, कृषेः आधुनिकीकरणाय, ग्रामीणार्थव्यवस्थायाः सुदृढीकरणाय तथा कृषकपरिवाराणां जीवने समृद्धेः सुखस्य च सञ्चाराय निरन्तरं प्रयासाः क्रियन्ते। 'अन्नदाता-सेवासङ्कल्पयात्रा' इत्यस्य माध्यमेन सन्देशः प्रदत्तः यत् कृषकाणां ग्रामाणां च विकासः प्रधानमन्त्रिणः प्राथमिकतासु अन्यतमः अस्ति।



महात्मागान्धिमहाविद्यालये 'इण्डिया @ २०४७ : ग्लोबल नॉलेज समिट' इति विषयमधिकृत्य अन्तर्राष्ट्रीय-सम्मेलनस्य भव्य उद्घाटनम्

दरभङ्गा, ०९ अक्टूबर २०२६।
हिमसंस्कृतवार्ताः राघव नाथ झा

महात्मागान्धिमहाविद्यालये 'इण्डिया @ २०४७ : ग्लोबल नॉलेज समिट' इति विषयमधिकृत्य आयोजितस्य द्विदिवसीयस्य अन्तर्राष्ट्रीयसम्मेलनस्य उद्घाटनसत्रे ललितनारायणमिथिलाविश्वविद्यालयस्य मानविकीसङ्कायस्य अधिष्ठात्री तथा स्नातकोत्तराङ्ग्लविभागस्य विभागाध्यक्षा डॉ. पुनीता झा ज्ञानस्य संस्कारेण, संस्कृत्या, परम्परया, विरासतया, आचारविचारैश्च सह सम्बन्धं प्रतिपादयन्ती भारतस्य मिथिलायाश्च सांस्कृतिकदार्शनिकगौरवं प्रकाशयामास। तया प्रतिपादितं यत् भारतीयसंस्कारेषु ज्ञानं संस्कृतिश्च निहिते स्तः, याभ्यां विश्वस्य मार्गदर्शनं निरन्तरं कृतम्। भारतस्य वैश्विकपरिचयः तस्य गौरवशालिनी विरासत् च अस्य प्रमुखं वैशिष्ट्यम् अस्ति। सम्मेलने वक्तव्यं प्रस्तुतवती स्नातकोत्तरगृहविज्ञानविभागस्य सहायकप्राध्यापिका डॉ. प्रगतिः अन्तर्राष्ट्रीयस्तरे भारतस्य वर्धमानस्य प्रभावस्य प्रशंसाम् अकरोत्। तया उक्तं यत् २०२६ तमे वर्षे सर्वैः स्वकीयदायित्वस्य निर्वहणं कर्तव्यम्।

महाविद्यालयस्य शासी-निकायस्य सचिवः डॉ. हरिनारायणसिंहः देशविदेशेभ्यः विभिन्नविश्वविद्यालयेभ्यः समागतान् एकादशाधिकशतं प्रतिनिधीन् तथा च अन्तर्जालमाध्यमेन सम्मेलनसम्बद्धान् १२३ विदुषः विदुषीश्च स्वागतं कृतवान्। सम्मेलनस्य सफलतायै शुभकामनाम् अर्पयन् तेन भारतस्य भाविवैश्विकस्थानविषये विचाराः प्रस्तुताः। तेन उक्तं यत् भारतं विश्वस्य तृतीयां आर्थिकमहाशक्तिं भविष्यति। ततः पूर्वं सम्मेलनस्य संयोजकः अर्थशास्त्रविभागाध्यक्षः डॉ. रघुवरप्रसादसिंहः विषयप्रवर्तनं कुर्वन् अवदत् यत् अस्मिन् सम्मेलने १२५ प्रतिभागिनः प्रत्यक्षतया भागं गृहीतवन्तः। सभायाः अध्यक्षतां प्राचार्यः प्रो. प्रेमकुमारः अकरोत्।

विभिन्नेषु सत्रेषु विषयविशेषचर्चा

भोजनावकाशानन्तरं भूगोलशास्त्रस्य, गृहविज्ञानस्य, भौतिकशास्त्रस्य, गणितस्य, राजनीतिविज्ञानस्य, रसायनविज्ञानस्य, मनोविज्ञानस्य तथा वनस्पतिविज्ञानस्य इत्येतेषाम् अष्टानां विभागानां पृथक्-पृथक् समूहान् निर्माय प्रतिभागिनः तकनीकीसत्रेषु विषयविश्लेषणं कृतवन्तः तथा शोधपत्राणि प्रस्तुतवन्तः। प्रो. दिलीपकुमारठाकुरः सूचितवान् यत् अष्टचत्वारिंशता प्रतिभागिभिः शोधपत्राणि प्रस्तुतानि। विंशत्यधिकैः विद्वद्भिः अन्तर्जालमाध्यमेन स्वकीयाः विचाराः सुझावाश्च प्रस्तुताः। तेषु दिल्लीविश्वविद्यालयस्य प्रो. जयगोपालशर्मा, श्रीलङ्कादेशीयः थारीन्दू उदायंगा कामबुरावाला, श्यामाप्रसादमुखर्जीविश्वविद्यालयस्य कुलपतिः प्रो. तपनकुमारशाण्डिल्यः, पटनाविश्वविद्यालयस्य प्रो. पूर्णिमासिंहः तथा जे. डी. वुमेन्स् महाविद्यालयस्य, पटनायाः डॉ. मंजरीनाथः प्रमुखाः आसन्।

सम्मेलनस्य सक्रियसदस्यः डॉ. रामनाथसिंहः अवदत् यत् आगामीसत्रे अमेरिकादेशस्य डॉ. नीरूप्रसादः, राजनीतिविभागस्य पूर्वविभागाध्यक्षः प्रो. मुनेश्वरयादवः तथा कुलसचिवा डॉ. दिव्यारानी हांसदा च स्वकीयम् अभिभाषणं प्रस्तोष्यन्ति। सत्रस्य समापनावसरे प्राचार्यः प्रो. प्रेमकुमारः समागतानाम् अतिथीनां प्रति कृतज्ञतां ज्ञापितवान्।

बिहारस्य मखान्नं विंशत्यधिकेषु देशेषु निर्यात्यते; वैश्विकं सुपरफूड् निर्मातुं लक्ष्यम् — विजयकुमारसिन्हा

'मखान्नं-समृद्ध्यभियानस्य' अन्तर्गतं २०३०–३१ तमवर्षपर्यन्तं ३०,००० मेट्रिक्-टन-मखान्ननिर्यातस्य लक्ष्यम्।

- मखान्नस्य उत्पादनं ९१,५१२ मेट्रिक्-टनपरिमितं कर्तुं तथा प्रसंस्करणस्य निर्यातस्य च वर्धनाय योजना।

- विश्वे उपभुज्यमानस्य मखान्नस्य प्रत्येकयोः द्वयोः पाकिटयोः एकस्मिन् मिथिलामखान्नस्य भौगोलिकसूचकाङ्कस्य (GI) चिह्नस्य स्थापनं लक्ष्यम्।

पटना, ०९ अक्टूबर २०२६

हिमसंस्कृतवार्ताः राघव नाथ झा

बिहारस्य मखान्नं विंशत्यधिकेषु देशेषु निर्यात्यते। कृष्युत्पादानां प्रसंस्कृतखाद्यपदार्थानां च निर्यातविकासप्राधिकरणस्य (APEDA) सहयोगेन बिहारसर्वकारः भौगोलिकसूचकाङ्केन (GI) चिह्नितायाः मिथिलामखान्नस्य अन्तर्राष्ट्रीयविपण्ये प्रचारप्रसाराय प्रयतते। अस्मिन् वर्षे अमेरिकादेशं, कनाडादेशं, आस्ट्रेलियादेशं, ग्रीसदेशं च प्रति बिहारस्य मखान्नजन्यपदार्थानां निर्यातः कृतः।

बिहारसर्वकारः पञ्चवर्षीयकार्ययोजनया मखान्नं वैश्विकं सुपरफूड् (Global Superfood) रूपेण प्रतिष्ठापयितुं प्रयतते। २०२६–२७ तः २०३०–३१ तमवर्षपर्यन्तं प्रवर्तमानस्य 'मखान्न-समृद्ध्यभियानस्य' प्रमुखानि लक्ष्यानि मखान्नकृषेः विस्तारः, उत्पादनवृद्धिः, मूल्यवर्धितपदार्थानां विकासः तथा अन्तर्राष्ट्रीयविपण्ये बिहारस्य भागधेयस्य सुदृढीकरणं च सन्ति।

कृषिमन्त्री श्रीविजयकुमारसिन्हा अवदत् यत् भारतस्य मखानोत्पादने बिहारस्य योगदानं प्रायः ८०–८५ प्रतिशतं वर्तते। २०२५–२६ वित्तीयवर्षे भारतात् ७,२०० मेट्रिक्-टनात् अधिकानां मखान्ननां तथा मूल्यवर्धितमखान्नजन्यपदार्थानां निर्यातः विंशत्यधिकेषु देशेषु कृतः। अनेन २२ मिलियन-अमेरिकीयडॉलरमितस्य निर्यातमूल्यस्य प्राप्तिः अभवत्। अमेरिकादेशे, मध्यपूर्वक्षेत्रे, आफ्रिकाखण्डे च भारतीयमखान्नस्य वर्धमाना मागः दृश्यते।तेन सूचितं यत् अस्मिन्नेव वर्षे GI-सूचकाङ्केन चिह्नितायाः मिथिलामखान्नस्य प्रेषणं अमेरिकादेशं, कनाडादेशं, आस्ट्रेलियादेशं, ग्रीसदेशं च प्रति कृतम्। प्रथमवारं बिहटास्थितात् बिहार औद्योगिकक्षेत्रविकासप्राधिकरणस्य (BIADA) औद्योगिकक्षेत्रात् १८ मेट्रिक्-टनपरिमिता GI-चिह्निता मिथिलामखान्नं समुद्रमार्गेण आस्ट्रेलियादेशं प्रति प्रेषिता। गुणवत्तायाः संरक्षणेन, GI-परिचयेन, विपणिसम्पर्कस्य विस्तारेण च कृषकाणाम् आयवृद्धेः नूतनाः सम्भावनाः उद्भवन्ति।

नवतिः कोटिरूप्यकैः मखान्नकृषेः विकासः

मन्त्रिणा कथितं यत् अभियानस्य अन्तर्गतं मखान्नकृषेः क्षेत्रफलं २०२५–२६ वित्तीयवर्षस्य ४१,००० हेक्टेयर्-परिमितात् क्षेत्रात् वर्धयित्वा २०३०–३१ वित्तीयवर्षपर्यन्तं ८२,००० हेक्टेयर् कर्तुं लक्ष्यम् अस्ति। एतस्मिन् अवधौ मखान्नस्य उत्पादनं ९१,५१२ मेट्रिक्-टनपरिमितं तथा निर्यातं ३०,००० मेट्रिक्-टनपरिमितं कर्तुं योजना अस्ति।

२०२६–२७ वित्तीयवर्षस्य कार्ययोजनायाम् ८,९७९.६८ लक्षरूप्यकाणां प्रावधानम् अस्ति। अस्याः राशेः माध्यमेन उत्पादनवर्धनाय सहायता, कटाईपश्चात् प्रबन्धनम्, अनुसन्धानं विकासश्च, ब्राण्डनिर्माणम्, अन्तर्राष्ट्रीयस्तरे प्रचारप्रसारश्च



प्रोत्साहयिष्यन्ते।

कृषकाणाम् आयः द्वादशगुणाधिकः वर्धितः

मन्त्रिणा सूचितं यत् उपलब्धतथ्यानुसारं २०१२–१३ वित्तीयवर्षे मखान्नकृषेः माध्यमेन कृषकस्य आधारभूतः वार्षिकः प्रतिहेक्टेयर्-आयः ३५,००० रूप्यकाणि आसीत्। स एव २०२५–२६ वित्तीयवर्षे वर्धमानः ४,२५,७५० रूप्यकाणि प्रतिहेक्टेयर् अभवत्। एवं प्रतिहेक्टेयर्-आयः द्वादशगुणाधिकः वर्धितः इति प्रतिपादितम्।

वैश्विकपरिचयस्य सुदृढीकरणे विशेषबलम्

मन्त्रिणा उक्तं यत् 'बिहार-विजन-२०३०' इत्यस्य अन्तर्गतं विश्वे उपभुज्यमानस्य मखान्नस्य प्रत्येकयोः द्वयोः पाकिटयोः एकस्मिन् मिथिलामखान्नस्य GI-चिह्नं भवेदिति लक्ष्यं निर्धारितम् अस्ति। अनेन बिहारस्य मखान्नस्य क्षेत्रीयपरिचयः, गुणवत्ताविश्वसनीयता, व्यावसायिकक्षमता च अन्तर्राष्ट्रीयविपण्ये अधिकं सुदृढा भविष्यन्ति।





उत्तराखण्डविद्वत्सभया हुतात्म-स्मारके सामूहिकं तर्पणं कृत्वा दिवङ्गतात्मभ्यः श्रद्धाञ्जलिः समर्पिताः

हिमसंस्कृतवार्ताः- देहरादूनम्।

उत्तराखण्डविद्वत्सभायाः तत्त्वावधाने शुक्रवासरे देहरादूनस्य न्यायालयपरिसरस्थिते हुतात्मस्मारके सामूहिकतर्पणस्य श्रद्धाञ्जलिसमारोहस्य च आयोजनं कृतम्। अस्मिन् कार्यक्रमे उत्तराखण्ड-राज्यान्दोलनकारिणां, स्वतन्त्रतासेनान्यां, राष्ट्ररक्षायै प्राणान् समर्पितवतां वीरसैनिकानां, विविधासु आपत्सु दिवङ्गतानां जनानाम् आत्मनां शान्त्यर्थं विधिपूर्वकं तर्पणं विहितं, तेभ्यश्च भावपूर्णः श्रद्धाञ्जलिः अर्पितः। कार्यक्रमस्य अध्यक्षस्थानम् हर्षपतिगोदियालः कृतवान्। अस्मिन्नवसरे उपस्थितैः विद्वद्भिः सदस्यैश्च दिवङ्गतानां त्यागस्य, सङ्घर्षस्य, बलिदानस्य योगदानस्य च स्मरणं कृत्वा तान् प्रति श्रद्धा कृतज्ञता च प्रकटिता। कार्यक्रमे सभायाः पूर्वाध्यक्षः आचार्य- जयप्रकाशगोदियालः, संरक्षकाः आचार्यः पवनशर्मा, आचार्यः डॉ. रामभूषणबिजल्वाणः, आचार्यः रामलखनगैरोला च विशिष्टतया उपस्थिताः आसन्। तैः मार्गदर्शनमपि प्रदत्तम्। अस्मिन् कार्यक्रमे सभायाः उपाध्यक्षः आचार्यः सत्यप्रसादसेमवालः, सचिवः आचार्यः अजय डबरालः, सहसचिवः आचार्यः मुरलीधर सेमवालः, कोषाध्यक्षः आचार्यः आदित्यराम थपलियालः, सङ्गठनसांस्कृतिकसचिवः आचार्यः राजेश अमोली, प्रवक्ता आचार्यः विपिन डोभालः, लेखाकारः आचार्यः दीपक अमोली च उपस्थिताः आसन्। एतान् अतिरिच्य सभागीतैः परमेशदीत्तैः सम्मानस्य, कृतज्ञतायाश्च भावना लोहनी, आचार्यः विकास नौडियालः, आचार्यः पवन बौडाई, आचार्यः कवीन्द सेमवालः, आचार्यः कृष्णानन्द नौडियालः, आचार्यः नीरज गोदियालः, आचार्यः कमलेश उनियालः, आचार्यः कमलेश नैनवालः, आचार्यः विकासभट्टः, आचार्यः महेन्द्रथपलियालः चापि कार्यक्रमे सहभागिताम् अकुर्वन्।अनेन कार्यक्रमेण उत्तराखण्डस्य अस्मितायाः, राज्यान्दोलनकारिणां ऐतिहासिक-सङ्घर्षस्य, स्वतन्त्रतासेनान्यां त्यागस्य, राष्ट्ररक्षायां वीरसैनिकानां सर्वोच्चबलिदानस्य च स्मरणं कृत्वा तेभ्यः श्रद्धाञ्जलिः समर्पितः। तथैव प्राकृतिकविपत्सु दिवङ्गतेभ्यः जनेभ्यः संवेदना प्रकट्य तेषामात्मनां शान्त्यर्थं प्रार्थना कृता। उत्तराखण्डविद्वत्सभया अस्य आयोजनस्य माध्यमेन समाजे पूर्वजानां, बलिदानिनां, दिवङ्गतात्मनः प्रति श्रद्धायाः, भावना सुदृढीकर्तुं



न्यायरत्न-वैयाकरण पण्डित महेशझामहोदयस्य व्यक्तित्वं कृतित्वञ्च

(जन्म २९/०६/१९०१- मृत्युः ३०/११/१९८३)-
डॉविमलेश झा रमेशकुंजः, गंगौली,
सरिसवपाही, मधुबनी, बिहार ८४७४२४

सुविदितमेवैतत् सप्तद्वीपेषु भारतखण्डस्य विशिष्टं महत्त्वम् अस्ति। भारतवर्षं स्वस्य ज्ञानस्य विद्यायाः च प्रकाशेन सम्पूर्णे विश्वे प्रसिद्धम् अस्ति। अतः देशीयाः विदेशीयाश्च विद्वांसः भारतं विश्वगुरुः तथा पुण्यभूमिः इति कथयन्ति। भारतभूमौ गङ्गा, यमुना, सरस्वती, सरयू, ब्रह्मपुत्रः, वाग्मती, नर्मदा, कमला, कावेरी इत्याद्याः पवित्राः नद्यः प्रवहन्ति। एताः नद्यः स्वस्य पवित्रजलेन भारतभूमिं सदा पवित्रां कुर्वन्ति। भारतभूमौ वसिष्ठः, वाल्मीकिः, मनुः, याज्ञवल्क्यः इत्यादयः ऋषयः तथा महर्षयः निवसन्तः तपसा ज्ञानेन च अस्याः भूमेः गौरवं वर्धितवन्तः। भगवान् परमेश्वरः अपि रामः, कृष्णः, नरसिंहः, वामनः इत्यादिभिः अवतारैः समये समये धर्मस्य रक्षणं कृतवान् तथा अधर्मस्य नाशं कृतवान्। इयमेव पवित्रा भारतभूमिः पाणिनि- कात्यायन- पतञ्जलि- कणाद- गौतम- व्यास- वाग्भट- बाण- कालिदास- भारवि- दण्डि- प्रभृतीन् महान् विदुषः जन्म दत्तवती। एते विद्वांसः व्याकरणे, दर्शने, आयुर्वेदे, साहित्ये तथा अन्येषु शास्त्रेषु महत्त्वपूर्णं योगदानं दत्तवन्तः। भारतभूमौ मिथिला, बङ्गः, वाराणसी च प्राचीनकालात् एव विद्या-अध्ययनस्य प्रमुखकेन्द्राणि आसन्। तेषु मिथिला स्वस्य ज्ञानपरम्परया विशेषरूपेण प्रसिद्धा अस्ति। मिथिला प्राचीनकालात् एव स्वकीयेन गौरवेण प्रतिष्ठिता अस्ति। अस्यामेव पवित्रभूमौ जगज्जननी जानकी प्रादुर्भूता। याज्ञवल्क्यादयः स्मृतिकाराः तथा न्यायशास्त्रस्य प्रवर्तकः गौतमः अपि अस्यां भूमौ प्रादुर्भूताः। दर्शनशास्त्रस्य अनेके महान्तः विद्वांसः अपि मिथिलायां जाताः। अत्रैव वाचस्पतिमिश्रः, मण्डनमिश्रः, उदयनाचार्यः, शङ्करमिश्रः, पक्षधरमिश्रः, गोकुलनाथः, गङ्गानाथः इत्यादयः विद्वांसः मिथिलायाः ज्ञानपरम्परां समृद्धां कृतवन्तः। अतः मिथिला केवलं पवित्रभूमिः नास्ति, अपि तु सा ज्ञानस्य, दर्शनस्य, संस्कृतभाषायाः च प्राचीनं केन्द्रम् अस्ति। मिथिलायाः विद्वत्परम्परा भारतस्य गौरवं वर्धयति। तत्र मिथिलायां प्राक्तन- तीरभुक्ति- प्रमण्डलान्तर्गत (सम्प्रति दरभंगा) दरभंगा-मण्डलान्तर्गते (सम्प्रति मधुवनीमण्डल) गङ्गौलीनामनगरी विदुषां वसतिरासीत्। श्रूयते खलु तत्र पुरा सुरदीर्घिकायाः गङ्गायाः एकोपधारा अमरावतीनदीरूपेण वर्षसहस्रादधिकपूर्वं प्रवहति स्म। तस्यैवोत्तरे तटे योगीनां यतीनां महर्षिकुमाराणाम् अध्ययनाध्यापनपीठरूपेण एकं विश्वविद्यापीठं (विश्वविद्यालय) आसीत्। किन्त्वस्येदानीं भग्नावशेषोऽपि नावाप्यते। भवतु नाम खननादिना प्रायः प्राप्येत। परं नद्याः नष्टावशेषमिदानीमपि चक्ररूपेण दरीदृश्यते। तत्तटेऽवस्थिता नगरी प्रायः गङ्गावली एव पश्चात् गङ्गौलीनाम्ना व्यवहृता जाता। अत्र प्रायः श्रोत्रियाः ब्राह्मणाः अवसन्। प्रायशः सर्वे श्रोत्रियाः विशिष्टाः विद्वांसः आसन्। श्रोत्रियः तावदुच्चकुलोत्पन्नः ब्राह्मणः वेदज्ञश्च भवति। शतवर्षपूर्वमपि प्रतिगृहं तत्र बहवः विद्वांसः आसन्। अधुना अपि गङ्गौलीग्रामे बहवो हि विद्वांसः सन्ति।अस्मिन्नेव ग्रामे एकाधिकोनविंशतिशततमे (1901) ख्रीष्टाब्दे जून मासस्य एकोनत्रिंशद्दिनांके (आषाढशुक्लत्रयोदश्यां) पलयिवाङ्महिषीमूलस्य वत्सगोत्रीयविद्वन्मण्डितस्य श्रोत्रियकुलावतंसस्य पण्डितकेशरिणो स्व. पण्डितगुणधरशर्मणः विन्ध्यमातेव विन्ध्येश्वरीदेव्युभयं एको विशिष्टप्रतिभाचक्षुर्युक्तबालकः समजायत। एतस्य नाम 'महेश' इति बभूव। यद्यत्र वयं एतस्य वंशपरम्परायाः अवलोकनं कुर्मस्तर्हि अस्य वंशपरम्परा मुख्यतया विद्वद्भिः शास्त्रनिपुणैः वा सञ्चालिता वर्तते। यतो हि भारतीयसंस्कृतस्य न केवलं एकमेव तन्त्रं एते स्पृशन्ति अपि तु विविधक्षेत्रेषु एतस्य प्रातिनिधित्वम् आसीत्। सर्वप्रथममत्र पलियवाङ्मूलस्य विषये किञ्चिद्वच्मि।

मूलस्याभिप्रायोऽस्ति व्यक्तेः मूलनिवासस्थानम्, पूर्वजस्य वा मूलनिवासस्थानम्।

वंशपरम्परां दृष्ट्वा वयं वक्तुं शक्नुमो यदेतेषां पैतृकपक्षः पूर्णविदुषां मण्डलमेवासीत्। पुनश्च यदि मातृपक्षे वयं पश्यामस्तर्हि एतेषां मातामहः नरोनकुलसम्भूतः कविराज- आदिनाथः द्वौ मातुलौ पण्डित श्रीनाथ-गौरीनाथौ प्रख्यातविद्वांसौ आस्ताम्। एतेषामुपनयनसंस्कारः अष्टमवर्षे अभवत्। एते महानुभावाः 'नराणां मातुलक्रमः' इति वचनस्यानादरं कृत्वैव स्वप्रारम्भिकीशिक्षां बाल्यावस्थायां मातुलगृहे महरैल (मधुबनी) इति ग्रामे पण्डितकलानाथझामहोदयाद् अधिगतवन्तः। अपि च धौतपरीक्षोत्तीर्णतात् वैयाकरणशिरोमणेः पण्डित नरसिंहझामहोदयादपि व्याकरणस्य प्रारम्भज्ञानं प्राप्तवान्। तदनु एते राजग्रामग्रामेऽपि अध्ययनं कृत्वा लक्ष्मीवतीसंस्कृतविद्यालये सरिसबग्रामे वैयाकरणमार्तण्डशास्त्रिशिरोमणीनां पण्डितमार्कण्डेयमिश्र- महाभागानां समीपे गत्वा व्याकरणमधीतवन्तः। अत्रैतदपि वक्तव्यं यद्देशे वंशपरम्परापूर्वतः व्याकरणस्य आसीत्। तद्यथा एतस्य पितृचरणाः स्वयमेव शाब्दिकाः आसन्। पुनश्च पितृव्यः पण्डितमार्कण्डेयझाशर्माणः अपि महान्तः वैयाकरणाः आसन्। श्रूयते च एतेषां सरस्वती गुप्ता आसीत्। अत्र गुप्तेति शब्दस्यार्थ यशादिकामनारहितः इत्यर्थः। केवलं स्वान्तः सुखाय एव एते व्याकरणमधीगतवन्तः। पण्डितमहेशझाशर्मा यदा पण्डित मार्कण्डेयमहानुभावस्य पार्श्वं गच्छति स्म, तदा स स्वयमेव कथयति स्म यद् भवान् प्रश्नान् पृच्छतु अहं ज्ञातुमिच्छामि यद् कौमुदी मया स्मरिता न वेति। पुनश्च ते अपि प्रश्नान् पृच्छन्ति स्म। प्रश्नभयात एते यदा कदा तान्दृष्ट्वैव कदाचित् गृहाद्बहिः गच्छति स्म। पण्डित मार्कण्डेयझाविषये विदितमस्ति यदेतैः आङ्ग्लभाषायाः 'Father', 'Mother' इत्यादिशब्दानां व्युत्पत्तिः व्याकरणशास्त्रेण सम्पादिता। इत्थं पण्डित मार्कण्डेयझा अपि एतेषां वंशपरम्परायां गुरवः आसन्। अनेनैव व्याकरणे पण्डितझामहाशयस्य पटुता जाता। तत्समये केवलं द्वयोः विषययोः एव प्रसिद्धिः आसीत्। प्रसिद्धिरित्यस्य अभिप्रायोऽस्ति रुचिः। छात्राः ये केचन संस्कृतविद्वांसः भवितुमर्हन्ति स्म ते सर्वप्रथमं केवलं न्यायव्याकरणयोः अध्ययनं कुर्वन्ति स्म, तदनु अन्यविषयाणाम्। तदा व्याकरणे कृतभूरिपरिश्रमाणां पण्डितझामहोदयानां कृते इदम् आवश्यकम् आसीत् यदेते न्यायविषयज्ञानाय गुरूपार्श्वं गच्छेयुः। तत्समये इदमपि आवश्यकम् आसीत् यत्सर्वे संस्कृतच्छात्राः काशीं गत्वा अध्ययनं कुर्युः। एतस्मात् कारणात् एते अपि १९८० तमे वर्षे काशीं गत्वा अध्ययनं कृतवन्तः। अत्र मिथिलेशपट्टमहिषीलक्ष्मीवती भोजनावासादिव्यवस्थां कृतवती। अत्र प्रमाणरूपेण महाभाष्यविमलाटीकायां द्वे पद्ये द्रष्टुं शक्नुमः- लक्ष्मीश्वर सिंहो जज्ञे नृपोयशोधवलितान्तः। आर्या तद्वहमहिला लक्ष्मीवती श्रीमती जयति।।

पुनश्च-

अधिसरिसबविद्यामन्दिरं यत्प्रसादादुरधिगमम धीतं शब्दतन्त्रं समन्तात्।
अतुलमहिमकाश्यां न्यायशास्त्रज्ञ तस्याः, करविकसितपद्मद्वन्द्वयोरप्येऽयम्।

अत्रेदमपि ज्ञायते यन्न केवलं काश्यामेव अपि तु सरिसबग्रामस्थ- लक्ष्मीवतीविद्यालयेऽपि मिथिलेशपट्टमहिषी- लक्ष्मीवत्याः साहाय्यं प्रदत्तमासीत्। तत्र क्वीनसमहाविद्यालये महामहोपाध्याय- जयदेवमिश्र, महामहोपाध्याय- वामाचरणभट्टाचार्य, महामहोपाध्याय राजेश्वरशास्त्रिद्रविडेतेषां समीपे गत्वा दशवर्षाणि यावत् न्यायवेदान्तादिविषयान् अधीत्य शास्त्रेषु विजयं प्राप्तवन्तः। इत्थमनेन व्याकरणतीर्थ- व्याकरणोपाध्याय- न्यायाचार्यपरीक्षासु उत्तीर्णता अवाप्ता। दर्शनशास्त्रस्य विशिष्टशाखायां मीमांसायां एतेषां रुचिः वंशगुणतः आसीत्। यतो हि एतेषां पितृव्याः मीमांसका जगद्धरशर्माणः न केवलं मीमांसका एव अपि तु मीमांसकशिरोमणयः आसन्। साम्प्रतावपि विविधप्रकाशनसंस्थाभिः यः वर्षकृत्यग्रन्थः प्रकाश्यते तत्र लिखितं भवति मीमांसकशिरोमणिना पण्डितजगद्धरशर्मणा प्रणीतिमिति। पण्डितझामहाशयस्य सर्वदा अध्यापने एव रुचिरासीत्। प्रश्नोत्तरलेखनादिकार्यं ते न कारयन्ति स्म। अत्र इदमपि कारणमस्ति यदिमे पुस्तकानि विनैव पाठयन्ति स्म। तद्यथा- पातञ्जलमहाभाष्य प्रौढमनोरमा- लघुशब्दशेखर- वैयाकरणभूषणसारादिग्रन्थान् पुस्तकानि विनैव पाठयन्ति स्म। महाभाष्यन्तु तेषामाकण्ठमेव आसीत्। मनोरमायाः विशिष्टाब्दरत्नटीका- परिभाषेन्दुशेखर- कौमुदीप्रभृतीनां ग्रन्थानामपि सः अध्यापने कुशलः आसीत्। न्यायशास्त्रे मुख्यरूपेण न्यायसिद्धान्त- मुक्तावलीग्रन्थस्य अध्यापनं ते कुर्वन्ति स्म। एकाहं वारद्वयं पाठस्य व्यवस्था तैः कृता आसीत्। प्रायः व्याकरणस्य सर्वेषां ग्रन्थानामध्यापनं ते कुर्वन्ति स्म।

सर्वेषां गुरूणामध्ये महामहोपाध्याय-राजेश्वरशास्त्रिमहाशयानां एतेषामुपरि विशिष्टा दृष्टिरासीत्। यतो हि तैः यदा कदा आर्थिकसहायतापि एतस्मै दत्ता। अन्येषां शास्त्राणामपि एते अध्ययनं कुर्वन्ति स्म। अध्यापनन्तु केवलं व्याकरणस्य क्षेत्रे एवासीत्। एतेषामध्यापनक्षेत्राणि पंचचिभागेषु आसन्-

1. सीतारामीय संस्कृत- विद्यालय- वाराहीसीतामढी (बिहारम्) 1925- 1932
2. बनैलीराज- कलावती- सुरभारती- संस्कृतविद्यालय- सुलतानगञ्ज भागलपुरम् (बिहारम्) प्रधानाध्यापकः 1932-1946
3. विक्रमशीला- वैदिकसंस्कृतमहाविद्यालय- सुलतानगञ्जम् भागलपुरम् (बिहारम्) प्राचार्य 1946- 1956
4. लक्ष्मीवतीसंस्कृतविद्यालयः (बिहारसर्वकारेण प्राप्तवृत्तिकः) सरिसबमधुबनी (बिहारम्) 1956-1964
5. मिथिला संस्कृतशोधसंस्थानम्, दरभंगा, बिहारम्, (विशिष्टविद्वान् प्राचीन पण्डितरूपेण आवासोपदेशकः) 1965- 1971 पर्यन्तम्

इत्थमनेन प्रायः षट्चत्वारिंशद्वर्षपर्यन्तं विविधसंस्थाभिः प्रदत्तपदानि अलङ्कृतानि। अत्रेदं ध्यातव्यं यत् पण्डितझामहाशयस्य अध्यापनकालस्य संस्थानामानि क्रमानुसारेण भिन्नानि दृश्यन्ते। यथा इतः पूर्वं प्रकाशितनिबन्धेषु इदमुल्लिखितमस्ति यदयं महानुभावः स्वाध्यापनस्य प्रथमसंस्थातः वराहीविद्यालयात् लक्ष्मीवतीसंस्कृतविद्यालये द्वितीयकार्यकालस्य कृते समागतवान्। तदनु सुलतानगञ्जविद्यालये अध्याप्य तत्रैव विक्रमशिला- संस्कृत-महाविद्यालयेऽपि अध्यापितवान्। परञ्च उक्तविषये मम समर्थनं नास्ति यतो हि वराहीविद्यालयः एव आसीत् अस्याध्यापनस्य प्रथमा संस्था अत्र नास्ति सन्देहलेशः। परञ्च द्वितीयसंस्था सुलतानगञ्ज एव विद्यते न तु लक्ष्मीवतीविद्यालयः। अत्रेदं प्रमाणं यद् सुलतानगञ्जस्यविद्यालयस्य प्राचीनप्रवेशपुस्तिकायां प्रायः अनेकेषां छात्राणां नामानि उपलभ्यन्ते ये केवलं गुरोः अध्ययनाय तत्र नामाङ्कनं अकारयन्। पुनश्च सन्ति बहवः छात्राः इदानीमपि ये द्वितीयकालेन अस्य सुलतानगञ्जविद्यालयमेव स्वीकुर्वन्ति। इतोऽपि अस्मिन्नेव निबन्धे अग्रे मया वक्ष्यते यत् संस्कृतशिक्षायाः आधुनिकीकरणस्य विरोधं कुर्वतां एतेषां लक्ष्मीवतीविद्यालये इतः सुलतानगञ्जतः स्थानान्तरणं बभूव।

पुनश्च द्वितीयो विचारः मम विद्यालयस्य नामविषये अस्ति। पूर्वप्रकाशितनिबन्धे इदमपि लिखितमस्ति यदयं महानुभावः सुलतानगञ्ज ग्रामे महाविद्यालयेऽपि अध्यापितवान् परञ्च तत्र अहं गतवान् आसम् तदा तत्रत्यानां जनानां भिन्नविचारान् ज्ञातवान्। तत्रत्या प्रवेशपुस्तिकापि इदं प्रमाणी करोति। तत्र प्रवेशपुस्तिकायां स्पष्टाक्षरेण दिनाङ्क 03-04-1930 तः 18-12-1955 यावत् आगतानां प्रवेशार्थिनां सम्पूर्णविवरणं लिखितमस्ति। तत्र एतदपि लिखितं वर्तते यद्- "ता० 5 अप्रैल सन् 1930 ई० दिनादारभ्य बिहारोत्कल- संस्कृतमित्यादिगृहीतस्य चैनशुल्कपञ्जस्यां गुरोः प्रतिष्ठापितस्य भागलपुरमण्डले विद्यमानस्य कलावती- संस्कृत-विद्यालयस्य छात्राणां प्रवेशपुस्तकम्" इति।पुनश्च विद्यालयोऽयं साम्प्रतमपि वैदिकविक्रमशिला- संस्कृतोच्चविद्यालयनाम्ना बिहारसंस्कृतशिक्षापरिषदा मानितः संस्कृतोच्चारे संलग्नोऽस्ति। विद्यालयविषये तत्रत्यः प्रधानाध्यापकः पण्डितश्रीनन्दनाथझामहाशयः प्राचीनविद्यालयविषये उक्तवान् तमनुसृत्य पण्डितझामहाशयः कलावतीविद्यालये एव 1930 तः 1955 पर्यन्तमासीत्। सुलतानगञ्जतः तस्य आगमनान्तरमेव विक्रमशिलामहाविद्यालयस्य नामकरणं प्रायः अभवत्। यतो हि प्रवेशपुस्तिकायां आरम्भतः अन्तपर्यन्तं प्रायः समेषु स्थलेषु पण्डितझामहाशयानां हस्ताक्षराणि प्राप्यन्ते। अस्तु विद्यालयनाम किमपि भवतु नास्यापत्तिः, परञ्चैव निश्चितमस्ति यत एतेषां अध्यापनस्य स्वर्णकालः सुलतानगञ्जे एव व्यतीतः। तत्रत्याः राज्ञः कृष्णानन्दसिंहस्य सचिवेन एतेषां मातुलः गौरीनाथवर्यः आसीत्। गौरीनाथस्य सम्बन्धः दरभंगामहाराज्ञा सह आसीत् यतो हि तस्य प्रपितामहस्य विवाहः महाराजमाधवसिंहस्य कन्यया सह अभवत्। पुनश्च सः स्वगुरु महामहोपाध्याय-कृष्णसिंहठक्कुरात् अध्ययनं प्राप्य गुरोः सम्पत्तिरक्षणे तं साहाय्यं प्रदत्तवान्। पुनः सः सुलतानगञ्जेऽपि राज्यशासने सहयोगाय राजाकीर्त्यानन्दसिंहमहाशयस्य सम्पर्के आगतवान्। उच्चशिक्षासाहित्यक्षेत्रे इदं क्षेत्रं सर्वोच्चस्थानं प्राप्तवान्। प्रायः बहूनां गंगापत्रिकानां सम्पादनमपि एते कृतवन्तः।

सम्प्रत्यपि पण्डितझामहाशयस्य चर्चा कुर्वन्ता कृष्णसिंहमहाराज्ञः पौत्राणां मुखात् प्रशंसावाक्यानि एव निस्सरन्ति। सः अपि पण्डितझामहोदयस्य विषये बहव्यः घटनाः जानाति। इयमेवासीत् पण्डितझामहाशयस्य विशिष्टता। अत्र श्रीकृष्णसिंहविषये बहूनि पद्यानि उक्तानि सन्ति तथथा-

लसदजगबिनाथे जह्नुकन्यासनाथे।
विलसित बुधपुञ्जे रम्यसुल्तानगञ्जे।।
सुरपतिजनमान्यः, कर्णतुल्योवदान्यः।
जयति सदय धीमान् कृष्णनन्दः कुमारः।।

तथा च-

रसाया स्थलं पूरयन्ती समन्तात्।
समुद्रेप्यभान्ती दिवं व्यापयन्ती।।
अधः कुर्वती पुण्यवन्तियस्तेजो।
विभर्तीह नक्तं दिवंगतेः सुकीर्तिः।।

सतर्कश्रुतिशास्त्रबोधकुशले शाब्दिकमार्दङ्गिकम्। वैदान्तं नटराजनृत्यचतुरं संसाररङ्गाङ्गणे। नेपथ्यं कृति कृष्णसिंहवदनो निर्वाणधर्मसमम्। ब्रह्माद्वैत विचारनामनटनं वाणी नरीनृत्यति।।

अत्र श्रीकृष्णसिंहस्य कृते पण्डितझामहोदयः सर्वोत्तमविद्वान् आसीत्। तत्र नाटकमञ्जसरेऽपि संयोजकरूपेण एते कार्यं कुर्वन्ति स्म। नाटकप्रदर्शनकाले राजा वदति स्म यत् 'नाटकमञ्चनकाले पण्डितझामहोदय एव केवलमस्ति पटुः' इति। आदर्शशिक्षके ये केऽपि गुणाः आवश्यका भवन्ति, ते सर्वे गुणाः झामहोदये आसन्। तमनुसृत्य यत्र छात्राः अध्ययनानन्तरं किमपि न जानन्ति तत्र शिक्षक एव दोषी विद्यते यतो हि तेन उक्तमासीत् 'वक्तुरेव तज्जाड्यं श्रोता यत्र न बुध्यते' अर्थात् यः कोऽपि गुरुः यदि छात्रस्य विषये वदति यत्रछात्रः जडबुद्धियुक्तः तर्हि नूनमेव तत्राध्यापकः एव जडबुद्धियुक्तो भविष्यति।

अध्यापनेन सह स्वमनोरञ्जनार्थं अभ्यासाय वा एते कृषिकार्यमपि गृहे कुर्वन्ति स्म। अध्ययनाध्यापनाभ्यां अवशिष्टकालं कृषिकार्य एव यापयन्ति स्म। स्वयमपि परिश्रमं कुर्वन्ति स्म। अपि च दैनिककार्यकर्तारं स्वीकृत्यापि कार्यसम्पादनं कारयन्ति स्म। प्रतिदिनं स्वोपास्थितौ एते दैनिकश्रमिकान् नियोजयन्ति स्म। एते प्रयोगात्मकरूपेण अपि कृषिकार्यं कुर्वन्ति स्म, अपि च न्यायशास्त्रस्योपयोगिता कृषिकार्येषु साधयितुमिच्छन्ति स्म। एते आयुर्वेदग्रन्थानामपि अध्ययनं कृतवन्तः आसन्। सर्वप्रथमं स्वरोगान्मुक्तये इमे आयुर्वेदप्रणालीतः औषधीनां निर्माणमपि करोति स्म। पुनश्च सार्ङ्गधरसंहिता-चरकसंहितेत्यादीनां ग्रन्थानामध्ययनमपि इमे कृतवन्तः। महोदयानां दिनचर्या सामान्या आसीत्। एते आस्तिकाः आसन्, परञ्च अहर्निशं ईश्वराराधनायां संलग्नाः न आसन्। ईश्वराराधनायै आवश्यकानि कार्याणि एव कृत्वा नित्यक्रियादिकं सन्ध्यादिशालिग्रामपूजां च कुर्वन्ति स्म। भोजनमपि सामान्यं सात्विकं च एभ्य रोचते स्म।

एते संस्कृतस्य पारम्परिकीं पद्धतिमनुसरन्तस्सर्वदा नवीनपद्धतेः खण्डनमेव कृतवन्तः। एतस्मात् कारणात् एतेषां जीवने काश्चित् समस्याः अपि समागताः। तस्मिन् समये 'बिहार- संस्कृत-एशोसिएशन' इति नामिका संस्था बिहारोत्कलसंस्कृतसमितेः अन्तर्गता आसीत्। अस्याः संस्थायाः कार्यम् आसीत् संस्कृतशिक्षायाः नवीनीकरणस्य कृते परामर्शदानम्। एतस्य परामर्शस्य कृते केचिदेव विद्यालयाः अधिकृताः आसन्। अस्य एशोसियेशनस्याध्यक्षत्वेन वीरमणिपाध्यायः, सचिवत्वेन च रामपदार्थशर्माभिधाशयः आस्ताम्। तत्समये एव सञ्चालितस्य संस्कृतसङ्घस्य अध्यक्षः पण्डित-नमोनारायणझामहाशयः आसन्। एते अपि शिक्षायाः नवीनीकर्तुं विरोधमकरोत् परञ्च अध्यक्षप्रयासेन ते स्वसमर्थनमपि दत्तवन्तः।

बहुप्रयासानन्तरमपि पण्डितझामहोदयः एतस्य नवीनीकरणप्रस्तावस्य समर्थनं न अकरोत्। एतस्मात् कारणात् श्रूयते यदेतेषां स्थानान्तरणं सुलतानगंजतः सरिसबविद्यालये जातम्। अद्यत्वे संस्कृतस्य या स्थितिः वर्तते तत्र प्रमुखं कारणमस्ति संस्कृतशिक्षायाः नवीनीकरणम्। नवीनीकरणेन या संस्कृतस्य गभीरता आसीत् सा गभीरता नवीनपद्धत्या विनष्टा कृता।

पण्डितझामहोदयस्य अध्यापनशैली अतिविशिष्टा आसीत्, यतो हि छात्रेभ्यः अस्य अध्यापनं रोचते स्म। अध्यापने अस्य 'छात्रसिद्धतायाः वैशिष्ट्यम्' सर्वदा आसीत्। एते यान् कानपि विषयान् पाठयन्ति स्म, तेषां पाठने एकमपि वाक्यं न आसीत्, येषां व्याख्या सर्वे छात्राः न जानन्ति स्म। कथनस्य अयमभिप्रायोऽस्ति यत् शिक्षकस्य इदं प्रथमं कर्तव्यं भवति यच्छात्राः तस्मादधिगतसर्वान् विषयान् जानेयुः। पुनश्च पण्डितझामहोदयस्य पार्श्वे छात्राणामध्ये प्रतिद्वन्द्विभावविकासाय प्रवृत्तिरासीत्। बहवः छात्राः आसन् येषां पार्श्वे प्रतिभा आसीत्। परञ्च ते तस्याः उपयोगकर्तुमेव न जानन्ति स्म। तेषां प्रतिभायाः विकासः एभि एव कृतः। आदर्शशिक्षकरूपेण एतेषां चर्चा कुर्वन् एतेषां प्रियशिष्यः पण्डितमहावीरझामहाशयः वदति स्म यद्-

'गुरुर्ब्रह्मागुरुर्विष्णु र्गुरुर्देवो महेश्वरः।
गुरुस्साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः

इत्युक्त्वा सः सादरं नमति स्म। सः वदति स्म यत् 'गुरवः एव मम कृते सर्वेसर्वा पथप्रदर्शकाश्च आसन्' इति। शिष्यपरम्परायाम् एतेषां बहवः शिष्या आसन् येषु बहवः अधुनापि संस्कृतक्षेत्रे स्वप्रतिभाध्वजम् उत्तोलयन्तः सन्ति। इतोऽपि केषाञ्चन नामानि अत्र दीयन्ते ये पण्डित- झामहाशयानां प्रमुखछात्राः आसन्-

नाम जन्मस्थानम्

1. स्व० पं० मधुकान्त झा – हनुमाननगर, मधुबनी
2. स्व० पं० गंगाधर झा – वनगांव, महिषी, सहरसा
3. स्व० पं० रामचन्द्र झा – तरौनी, मधुबनी
4. स्व० पं० रमानन्द झा – गंगौली, मधुबनी
5. पं० महावीर झा – उजान, दरभंगा
6. स्व० पं० मणिनाथ झा – पाहीटोल, मधुबनी
7. स्व०पं० तेजोनाथ मिश्र – जमथरी, दरभंगा
8. पं० उमानाथ झा – उजान-बहेरा, दरभंगा
9. पं० श्रीखण्डनाथ मिश्र – लालगंज, मधुबनी
10. स्व० पं० रमेश झा – गंगौली / पातेपुर, वैशाली
11. स्व० पं० खगेश झा – गंगौली, मधुबनी
12. पं० विघ्नेश झा – गंगौली, मधुबनी
13. स्व०पं० पुण्यधर झा – बेगूसराय
14. स्व० पं० जटाशंकर झा – बखरी, बेगूसराय
15. पं० श्रीकृष्ण झा – कोइलख, मधुबनी
16. पं० श्री रविनाथ झा – तरौनी, मधुबनी
17. स्व० पं० श्री सुरेश झा – सुरसण्ड, नेपाल
18. स्व० पं० सुरेश झा (पुत्र) –गंगौली, मधुबनी

विदुषां रचनाभिः सर्वे लाभं प्राप्नुवन्ति। परञ्चात्र संस्कृतविदुषां मध्ये प्रकाशनं प्रति प्राचीनकालतः एव काचिद् उदासीनता दरीदृश्यते। प्रायः मिथिलायामपि बहवः विद्वांसोऽभवन् येषां बहव्यः रचनाः अधुना नोपलभ्यन्ते। परञ्चात्र पण्डित-झामहोदयः प्रायः तत्समये एव जानाति स्म, यत् भविष्यकाले रचनानां महत्वं अत्यधिकं भविष्यति। अत एव एते बहूनि पुस्तकानि, बहवः निबन्धाश्च रचितवन्तः। पुस्तकप्रकाशनाय अनेन एका प्रकाशनसंस्था विमलाकार्यालयः सुलतानगंजक्षेत्रे स्थापिता। विमलामधिकृत्य अस्य एका टीका अस्ति यस्याम् अनेन स्वपरिचयः पद्यरूपेण दत्तः अस्ति। तद्थाथा – एतेषां प्रायः मुख्यरूपेण द्वादश रचनाः सन्ति यासु नवरचनाः प्रकाशिताः तिस्रश्च अप्रकाशिताः सन्ति। प्रकाशितासु एकां रचनां विहाय सर्वाः सुल्तानगंजत एव प्रकाशिताः सन्ति। तेषां नामानि अत्र दीयन्ते-

1. नवाह्निकपर्यन्तं महाभाष्यविमलाव्याख्या- सम्प्रति केन्द्रीय- संस्कृत- विश्वविद्यालयः, नवदिल्लीतः प्रकाशितः।
2. एकोद्दिष्टसारिणी
3. वर्षकृत्यम्– पण्डितजगद्धरशर्मणः वर्षकृत्यस्यैव परिवर्द्धितसंस्करणमिदमस्ति।
4. धातुसारः 5. विषयतावाद
6. नञर्थवादः 7. जातिवादपरिष्कारः
8. स्फोटनिरूपणम्
9. तर्कप्रदीपः– 1978 तमे वर्षे मिथिलाशोधसंस्थानं दरभंगातः प्रकाशितेयं मौलिकी रचना 108 पृष्ठात्मिकास्ति। अत्र न्यायविषये बहवः हि निबन्धाः सन्ति। एतस्याः रचनायाः कृते कलकत्तास्थहनुमानमन्दिरन्यासेन 1975 तमे ख्रीष्टाब्दे पञ्चविंशतिशतानि(2500) रूप्यकाणि प्रदत्तानि।

अवशिष्टाः अप्रकाशिताः रचनाः

1. लघुशब्देन्दुशेखरव्याख्या (कारकान्ता)
2. महाभारतव्याख्या (चूर्णिकाभीष्मपर्यन्तम्)
3. दारुविंहंगमः (विमानशास्त्रम्)

एतेषां ग्रन्थानां प्रकाशनं सम्प्रति अत्यावश्यकं अस्ति यतो हि अप्रकाशनेन पुस्तकानां विशिष्टताः विदुषां समक्षे नागमिष्यन्ति। परञ्च अप्रकाशितग्रन्थानां उपलब्धतायामुपरि काश्चिद् शङ्काः सन्ति। यतो हि तेषां सर्वाः रचना वाराणस्यां राजेश्वरशास्त्रिमहोदयस्य पुस्तकालये लक्ष्मणशास्त्रीमहाशयस्य पार्श्वे सन्ति। परञ्च तत्रापि सन्ति न वेत्यत्र संदेहस्य स्थितिर्विद्यते।

एतेषां पण्डितझामहोदयानां पारिवारिकस्थितिं यदि वयमवलोकयामः तर्हि तत्रापि संस्कृतज्ञानां स्थितिरेव सुदृढा वर्तते। अस्य मिश्रोपाख्यस्य षष्ठीनाथशर्मणः पुत्र्या सह पाणिग्रहणसंस्कारोऽभवत्। ततः एतेषामहाभागानां कालक्रमेण द्वौ पुत्रौ तिस्रः कन्याश्च समभूवन्। अन्येषु ग्रन्थेषु अपि पण्डितझाविषये लिखितमस्ति। तत्र "मिथिला की पाण्डित्य परम्परा" इत्याख्ये ग्रन्थे पण्डितडोरीलालशर्मा श्रोत्रियो लिखति 'यदेतेषां जन्म 1900 तमे वर्षे अभवत्।' परञ्चान्यत्र सर्वेषु स्थानेषु 1901 तमे वर्षे इति लिखितमस्ति। इतोऽपि एतेषां प्रारम्भिकशिक्षा व्याकरणाध्ययनं वा नरसिंहझामहोदयस्य पार्श्वे अपि अभवत्। अस्य तर्कप्रदीपग्रन्थविषये सः ग्रन्थकारः लिखति' यदस्मिन् ग्रन्थे तत्वचिन्तामणिदीधिति एवं आलोके तस्य व्याख्यायाः सारांशान् आहृत्य तर्कविषयानां सांगोपांगविवेचनं कृतमस्ति'।

पण्डितझामहाशयस्य बहुषु गुणेषु एको विशिष्टगुणः आसीत् तस्य स्वाभिमानक्षमता। अत्रैकमुदाहरणं प्रस्तूयते। पण्डितझामहाशयस्य पितृव्यजः पण्डितश्रीविघ्नेशझामहाशयः तस्मिन् समये संस्कृतविश्वविद्यालये अध्ययनं करोति स्म। तत्समये सेवानिवृत्तिं प्राप्य पण्डितझामहाशयोऽपि गंगौलग्राम एव निवसति स्म। संस्कृतविश्वविद्यालयस्य कुलपति डा० रामकरणशर्मामहाशयः पण्डितझामहाशयस्य पितृव्यजं प्रति उक्तवान् यद् भवान् गत्वा स्व पितृव्यं कथयतु यत् ते अत्रागत्य अध्यापने सहयोगं दद्युः यद्यागमने कठिनता अस्ति तदाहं वाहनं स्वीकृत्य गमिष्यामि। इमं सन्देशं श्रुत्वा पण्डितझामहोदयः सविनयं प्रोवाच यद् त्वम् गत्वा तं कथय यद् अहं गन्तुमसमर्थोऽस्मि अपि च तेषां कृते ममगृहस्य मार्गः लघुः विद्यते। अतः अत्रागमनस्य कृते कष्टं न कुर्यादिति। प्रायः एतादृशी भावना प्राचीनकाले सर्वेषां संस्कृतविदुषामन्तःकरणे भवति स्म, तत्र अयमपि परम्परावर्धनं कृतवान्। आदर्शशिक्षकस्य ये गुणाः आवश्यकाः भवन्ति ते सर्वे प्रायः पण्डितझामहाशयस्य पार्श्वे आसन्। अद्य अस्मिन् क्षेत्रे प्रायः शिक्षकानाम् आदर्शता शनैः शनैः ह्रासमाना भवति। आदर्शशिक्षकस्य आदर्शता तदैव चिरकालिका स्थास्यति यदा तस्य विचारे मौलिकी भावना भवेत्। मौलिकीत्युक्तेः अभिप्रायोऽस्ति पक्षपातरहिता। अद्यतनीयः शिक्षकः विद्यालयप्रशासनमनुसृत्य सर्वकारमनुसृत्य पदाधिकारीणमनुसृत्य च स्वविचारेषु परिवर्तनं यदा कदा कुर्वन्ति। आदर्शशिक्षकस्य एतत्परमं कर्तव्यं भवति यतः अध्यापनावसरे पूर्णक्षपातरहितो भूत्वा अध्यापनं कुर्यात्। परञ्च अत्र कुत्रचित् एतादृशमुदाहरणमपि वयं प्राप्नुमः यत्र अध्यापकः स्वपरिवारजनानां हिताय स्वच्छात्राणां समयनष्टकरणे कष्टं न अनुभवन्ति अर्थात् यदि अध्यापनावसरे पुत्रादयः अन्येषां कार्याणां सम्पादनाय अध्यापकस्य पार्श्वे समागच्छन्ति तर्हि सः अध्यापने बाधां स्वीकृत्य स्वपरिजनकार्याणि सम्पादयति। परञ्च केचन एतादृशाः अपि सन्ति ये स्वछात्राध्यापनसमये कापि बाधां न इच्छन्ति। तेषां मध्ये एव पण्डितझामहाशयः अपि आसीत्। अत्र एका घटना मया तस्य छात्रामुखादेव श्रुता अस्ति। तस्य छात्रः पण्डितविघ्नेशझामहाशयः गृहे एव तस्माद् व्याकरणमहाभाष्यं प्रतिदिनं गत्वा पठति स्म। अध्यापनकाले एव यदाकदा तस्य पुत्रोऽपि स्वकार्यसम्पादनाय आगच्छति स्म। तत्र यदि तेषां पण्डितझामहोदयानां अध्यापने मनोयोगः पूर्णरूपेण न भवति स्म तर्हि तस्य कार्यसम्पादनं कुर्वन्ति स्म। परञ्च यदा तेषां मनोयोगः पूर्णः अध्यापने भवति स्म तदा बहुधा ते स्वपुत्रोपरि क्रुद्धो भूत्वा बहूनि वाक्यानि उच्चारयन्तः कार्यसम्पादनं नैव कुर्वन्ति स्म। इयं घटना शिक्षकानां कृते उदाहरणयोग्या अस्ति यतो हि सम्प्रति बहुत्र वयं पश्यामः यच्छिक्षकाः स्वपुत्रादीनां हिताय प्रतिभायुक्त-छात्राणां कृते पक्षपातयुक्ताः भूत्वा कार्यं कुर्वन्ति। परञ्च अत्र एतदपि ध्यातव्यं यच्छात्राः सन्ति शिक्षकानां पदचिह्नसेवकाः अत एव तैः सह पक्षपातव्यवहारः सर्वथा त्याज्यः इत्येवास्ति पण्डितझामहोदयस्य सर्वेषां शिक्षकानां कृते सन्देशवाक्यम्। अत्र उक्तविषयस्य चर्चायाः आवश्यकता आसीत् यतो हि संस्कृतविद्वांसः सम्प्रति उच्चवेतनं लब्ध्वा स्वविषयं प्रति उदासीनाः भवन्ति। अत्र पं. झामहाशयस्य संस्मरणमेकं अस्माभिः श्रूयते। एकदा कश्चन छात्रः पं. झामहाशयाय एकां सूचनां प्रदत्तवान् यत् एकस्य अन्तेवासीछात्रस्य नियुक्तिः प्राध्यापकपदे अभवदिति। सूचनेमां प्राप्य पं. झामहाशयः तम् पृष्टवान् यत् यदि अध्यापकपदे नियुक्तिः जाता, तर्हि तस्य वेतनमपि अधिकं भविष्यति? कियती रूप्यकाणि प्राप्स्यति सः? छात्रेण उत्तरितं यद् प्रायः त्रिसहस्ररूप्यकाणि। एतच्छ्रुत्वा पं. झामहाशयः स्तब्धो जातः। छात्रेण पृष्टम् यत् भवान् कथं स्तब्धो अभवत्। तदा सः उत्तरितवान् यद् मम स्तब्धता संस्कृतस्य भविष्यत्कालस्य ह्रासस्य कृते विद्यते। अत्र एतदपि ध्यातव्यं पं. झामहाशयस्य जीवनकालस्य उत्तरार्द्ध एव संस्कृतस्य स्थितौ काचिन्न्यूनता समागता।इत्थं वयमत्र पश्यामः यत् पण्डितझामहाशयस्य पठनपाठने यादृशी रुचिरासीत् तादृश्येव रुचिः ग्रन्थलेखने छात्रस्य प्रतियोगितायाः कृते सिद्धतायां चापि आसीत्। इतोऽपि प्रायः सर्वेषु विषयेषु एतेषां प्रवेशः एव नहि अपितु तत्रापि प्रगल्भता आसीत्। आयुर्वेदशास्त्रं भवतु वा मीमांसाशास्त्रं सर्वत्र समाना स्थितिरासीत्। अयमेको विधिज्ञोऽपि आसीत्। यदा कदा भूमिविवादनिवारणाय विधिशास्त्रस्य साहाय्यं स्वीकृतवन्तः आसन्। अनेनैव वक्तुं शक्नुमो यदेकस्य पूर्णमानवस्य पार्श्वे येषां गुणानां प्रामुख्येन आवश्यकता भवति ते सर्वे गुणाः प्रायः पण्डितझामहोदयस्य पार्श्वे आसन्।अनेनैव प्रायः द्व्यशीतिवर्षात्मकं स्वीयं शास्त्रसाधनायुक्तं जीवनं समाप्य एते 1983 तमे ख्रीष्टाब्दे नबम्बरमासस्य त्रिंशद्दिनांके (कार्तिककृष्णद्वादश्यां) पञ्चभौतिकं शरीरं परित्यज्य शिवसायुज्यं प्राप्तवन्तः। एतेषां परमविदुषां कृते अहं प्रणामांजलिं समर्पयामि।

पण्डितरामवृक्षपाठक-अखिलभारतीयसङ्गीतसम्मेलनेन कलाकाराणां सुमधुरगायनेन समाकृष्टाः श्रोतारः



ध्रुपद-धमारगायनेन पण्डिताभिरामपाठकः, सुगमसङ्गीतेन च अरुणपाठकः श्रोतॄन् मन्त्रमुग्धान् अकुरुताम्।

हिमसंस्कृतवार्ताः- बोकारो।सेक्टर-षष्ठस्थे बी-साईमन्दिरपरिसरे गुरुवासरे सायङ्काले पण्डितरामवृक्षपाठक- अखिलभारतीय-सङ्गीतसम्मेलनस्य आयोजनम् अभवत्। प्रसिद्धतबलावादकस्य पण्डितबच्चनजीमहाराजस्य संयोजकत्वे आयोजिते अस्मिन् कार्यक्रमे वरिष्ठैः नवोदितैश्च कलाकारैः शास्त्रीयगायनस्य सुगमसङ्गीतस्य च सुमधुराः प्रस्तुतयः प्रदत्ताः। कार्यक्रमस्य शुभारम्भः कलाकाराणां स्वागतसत्कारेण अभवत्।सम्मेलनस्य मुख्यातिथिः मुख्यगायकश्च गयाघराणस्य अन्तरराष्ट्रीयख्यातिप्राप्तः गायकः पण्डिताभिरामपाठकः आसीत्। आयोजनसमित्याः पक्षतः गायकः अरुणपाठकः पुष्पगुच्छं शालं च प्रदाय तस्य सम्मानम् अकरोत्।

कार्यक्रमे अर्कदेवाचार्यः रागमारुबिहागे निबद्धगानम्, ब्रह्मानन्दगोस्वामी भजनम्, प्रभामोहन्नायरः कर्णाटकसङ्गीतं च प्रस्तुतवन्तः। एतेषां प्रस्तुतिषु पण्डितबच्चनजीमहाराजः तबलावादनेन सङ्गतिम् अकरोत्। आराध्या रागकेदारे गायनं प्रस्तुतवती, यस्यां रुद्रानन्दः तबलावादनेन सङ्गतिम् अकरोत्।गायकः अरुणपाठकः 'ज्योत से ज्योत जगाते चलो', 'प्रेम की गंगा बहाते चलो', 'तोरा मन दर्पण कहलाए' इत्यादीनि भजनानि प्रस्तुतवान्। महाकविविद्यापतिना विरचितं मैथिलीकृष्णभजनं 'माधव कते तोर करब बड़ाई', मैथिली-नचारी 'बाबा नेने चलियौ हमरो अपन नगरी' इत्येतयोः सुमधुराभ्यां प्रस्तुतिभ्यां सः श्रोतॄन् मन्त्रमुग्धान् अकरोत्। बालकलाकारा रचना पाठका रागजौनपुर्यां 'पायल की झनकार बैरनियाँ' इति लघुख्यालं प्रस्तुत्य उपस्थितानां प्रशंसाम् अलभत। तस्याः पिता स्वागतपाठकः तबलावादनेन सङ्गतिम् अकरोत्। हिमांशुशेखरमिश्रः झपतालले एकलतबलावादनं प्रस्तुतवान्। ओमशङ्करः वंशवादनेन श्रोतॄन् आनन्दितवान्।बालकलाकाराः अकीतबप्रभाकरः, पीयूषअनुरागः, आयुष्मान्भट्टाचार्यः, समदर्शी च एकलतबलावादने कहरवातालस्य त्रितालस्य च प्रस्तुतिभिः श्रोतॄणां प्रशंसाम् अलभन्त। सदयकुमारझा की-बोर्डवाद्येन विविधाः मधुरधुनयः श्रावयित्वा श्रोतॄणां प्रशंसाम् अवाप्तवान्। दीपानारायणगोस्वामी, शङ्करकुमारः, गोपालचौबे, प्रमोदकुमारः, देवदीपः, हिमांशुराजः भजनानि च प्रस्तुतवन्तः।सम्मेलनस्य प्रमुखमाकर्षणम् आसीत् पण्डित- अभिरामपाठकस्य शास्त्रीयगायनम्। सः रागबागेश्र्यां ध्रुपदं धमारं च प्रस्तुत्य सङ्गीतरसिकान् आनन्दसागरे निमज्जितवान्। तस्य प्रस्तुतौ पण्डितबच्चनजीमहाराजः पखावजवादनेन दीपानारायणगोस्वामी च हार्मोनियमवादनेन उत्कृष्टां सङ्गतिम् अकुरुताम्। अस्मिन् अवसरे साईमन्दिरस्य राकेशश्रीवास्तवः, वरिष्ठसङ्गीतज्ञः आर. एन. दुबे, वित्तकोषाधिकारी सङ्गीतप्रेमी च रितेशझा, स्वपनकुमारः, नौदिनीदुबे, सम्पूर्णपाठकः, उषापाठकः इत्यादयः बहवः सङ्गीतप्रेमिणः श्रोतारः च उपस्थिताः आसन्।

लोहारूखण्डस्तरीयकार्यक्रमे सोमबीरशास्त्रिणे 'श्रेष्ठशिक्षकसम्मानः' प्रदत्तः

हिससंस्कृतवार्ता भिवानी ०५ अक्टूबर २०२६

पी एम श्री राजकीय वरिष्ठ माध्यमिक विद्यालय ढिगावा जाटान लोहारूमध्ये आयोजिते एकस्मिन् भव्ये खण्डस्तरीयकार्यक्रमे उत्कृष्टशिक्षासेवायै संस्कृतशिक्षकः श्रीसोमबीरशास्त्री 'श्रेष्ठशिक्षकसम्मानेन' विभूषितः। एतस्मिन् गरिमामये समारोहे भिवानी-महेंद्रगढ़लोकसभाक्षेत्रस्य यशस्वी सांसदः श्रीधर्मबीरसिंहः मुख्यअतिथिरूपेण उपस्थितः आसीत्। मुख्यातिथिः श्रीधर्मबीरसिंहः दीपप्रज्वलनेन कार्यक्रमस्य शुभारम्भम् अकरोत्। तदनन्तरं तेन सोमबीरशास्त्रिणे प्रशस्तिपत्रं, स्मृतिचिह्नं च प्रदाय तस्य सम्मानं कृतम्। स्वकीयसम्बोधने सांसदः अवदत् यत् — "शिक्षकः समाजस्य राष्ट्रस्य च निर्माता भवति। सोमबीरशास्त्रिणः शिक्षाक्षेत्रे, विशेषतः संस्कृतभाषायाः संवर्धने यत् योगदानम् अस्ति, तत् अतीव प्रशंसनीयम् प्रेरणादायी च अस्ति। ईदृशाः कर्तव्यनिष्ठाः शिक्षकाः एव समाजस्य वास्तविक्यः सम्पदः सन्ति।"

सम्मानप्राप्तेः अनन्तरं सोमबीरशास्त्री मुख्यातिथये, आयोजकेभ्यः च कार्तज्ञ्यं व्यक्तीकृतवान्। सः अवदत् यत् एषः सम्मानः मम दायित्वं अझि च वर्धयति, अहम् अग्रे अपि छात्रेभ्यः संस्कृतभाषायै च पूर्णनिष्ठया सेवां करिष्यामि।अस्मिन् अवसरे शिक्षाविभागस्य वरिष्ठाधिकारिणः, गणमान्याः नागरिकाः, शिक्षकाः तथा च छात्राः बृहत्संख्यायाम् उपस्थिताः आसन्।



"संस्कृत कथा मञ्जरी" {३०} (१) ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।। "अथ शालिवाहनयुद्धवर्णनं नाम चतुर्विंशोपाख्यानम्"

पुनरपि राजा यावत् सिंहासनम् आक्रमितुमुपक्रमते, तावदन्या पुत्तलिका तमपवार्य्य समवदत्- भो राजन्! यस्य विक्रमस्यौदार्य्यादयो गुणाः सन्ति सोऽस्मिन् सिंहासने उपवेष्टुं क्षमः। भोजरानोक्तं- भो पुत्तलिके! कथय तस्य विक्रमस्य औदार्यादिगुणवृत्तान्तम्। सा अब्रवीत- श्रूयतां राजन्। आसीत् विक्रमादित्यस्य विषये [राज्ये इत्यर्थ] पुरन्दरौ नाम नगरी। तत्र महाधनिकः कश्चिद्वणिगवसत्। तस्य च चत्वारः पुत्रा आसन्। अथासौ एकदा तान् आहूयावादीत्- भोः पुत्राः! मयि मृते युष्माकं चतुर्णामेकत्रावस्थानं यदि न सम्भवेत्, तदा पश्चात् विवादो भविष्यति, तस्मात् जीवन्नेव भवतां चतुर्णां ज्येष्ठानुक्रमेण भागमकार्षं मञ्चाधस्ताश्चत्वारस्ते भागा निक्षिप्ताः सन्ति ज्येष्ठकनिष्ठभागक्रमेण गृह्णीतं, तैरङ्गीकृतं च। ततस्तस्मिन् परलोकं गते चत्वारो भ्रातरो मासमेकत्र स्थिताः। ततः तेषां स्त्रीणां परस्परं कलहो जातः तदन्तरं तैर्विचारितं, किमर्थं कलहः क्रियते? पित्रा जीवतैव पूर्वं चतुर्णां विभागः कृतोऽस्ति तत् मञ्चाधः स्थितं विभागक्रमं गृहीत्वा विभक्ताः सन्तः वयं सुखेन तिष्ठामः। इत्युक्त्वा यावन्मञ्चाधः खनन्ति तावश्चतुर्णां पादानाम् अधश्चत्वारि सम्पुटानि दृष्टानि तेषां मध्ये एकत्र सम्पुटे मृत्तिकाः अवर्त्तन्त अन्यत्र अङ्गारा आसन्, अपरस्मिन् अस्थीनि स्थितानि, चतुर्थे च पलालपुञ्जः स्थितः। एवमेतत् सम्पुटचतुष्टयं दृष्ट्वा ते चत्वारः भ्रातरः विस्मयं गताः परस्परं प्रोचुः- अहो! अस्मात् पितृकृतसम्यग्विभागक्रमात् अर्थविभागक्रम केन ज्ञायते? इत्युक्त्वा तैः राजसभां गत्वा तस्याः पुरतः सर्वो वृत्तान्तः निवेदितः। सभ्यैरपि विभागक्रमो न अवबुध्यत। पुनश्चत्वारः भ्रातरो यत्र तत्र ज्ञातारः सन्ति तेषां पुरतः अमु वृत्तान्तं निवेदयन्ति स्म, परं कोऽपि निर्णयं कर्त्तुं न शशाक। अथ एकदा उज्जयिनीं समागतास्ते राजसभामागत्य राज्ञः सभायाश्च पुरतो विभागवृत्तान्तमामूलमकथयन्। राज्ञा सभया चापि विभागक्रमो न ज्ञातः। तदनन्तरम् एकदा तैः प्रतिष्ठानाभिधेयं नगरान्तरं गत्वा तत्रत्यानां महाजनानां पुरतः तद्वृत्तान्तं भणितुमारब्धम् तेऽपि निर्णेतुं न शेकुः।

डा. वर्षा प्रकाश टोणगांवकर ©®
पुणे, महाराष्ट्रम्